RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937

॥ ओ३म् ॥

अन्यायोपार्जितं द्रव्यं
दश वर्षाणि तिष्ठति।
प्राप्ते चैकादशे वर्षे
समूलं तद् विनश्यति॥

(चाणक्य-नीति)

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेवसाइट.: www.sanskritsamvad.com मूल्यम्-रू. ५/-

॥ ओ३म् ॥

अयुक्तं स्वामिनो युक्तं
युक्तं नीचस्य दूषणम्।
अमृतं राहवे मृत्युर्विषं
शङ्करभूषणम्॥

(चाणक्य-नीति)

卐 वर्षम्-७ 卐 अंकः-१३ (१५५) 卐 १ जनवरीमासः २०१८ तः १५ जनवरीमासः २०१८ पर्यन्तम् 卐 विक्रमसंवत्-२०७४ 卐 सृष्टिसंवत्-१,९६,०८,५३,११५ 卐 पृष्ठम्-८

## विद्यापीठे सम्पन्ना 21 दिवसीया 'शिक्षकदक्षता संवर्धन कार्यशाला'

सलिलकान्तः त्रिपाठी

नवदेहली। श्रीलालबहादुरराष्ट्रियसंस्कृतविद्यापीठे पं.मदन मोहन मालवीय शिक्षा एवं शिक्षक राष्ट्रीय मिशन (मानवसंसाधनमंत्रालयः भारतसर्वकारः) द्वारा प्रचल्यमाना 21 दिवसीया 'शिक्षकदक्षतासंवर्धनम्' कार्यशाला अद्य सम्पना । एषा कार्यशाला रमेशप्रसादपाठकः, पूर्वसंकायप्रमुखः प्रो. नागेन्द्र झा, प्रो. रचनावर्मा मोहन,प्रो. भरतभूषण गुरु नानकदेवविश्वविद्यालय अमृतसरतः दीपाकौत्स प्रभृतयः विद्वांसः अन्ये च विभिन्नेभ्यः विभागेभ्यः तदीयाः विभागाध्यक्षाः उपस्थिताः आसन् । समापनसत्रस्य आरम्भः शोधच्छात्रा प्रीतिसिंहेन मंगलाचरणमाध्यमेन कृतः । सर्वेषां विदुषां




28 नवम्बर आरभ्य 21 दिसम्बरपर्यन्तं निर्धारिता आसीत् । अस्याः कार्यशालायाः समापनसत्रे विद्यापीठस्य कुलपतिः प्रो0 रमेशकुमार पाण्डेयः,मुख्यातिथिः डा.ओ.पी पाण्डेय (रक्षाविशेषज्ञः पी एम ओ सेन्टिफिक एडवाइजर) शिक्षाशास्त्रस्य संकायप्रमुखः प्रो. वाचिकस्वागतं शिक्षाशास्त्रविभागस्य संकायप्रमुखेन प्रो. पाठकमहाभागेन आचरितम् । सर्वान्उद्बोधयता कुलपतिना प्रो. पाण्डेयवर्येण उक्तं यत् यथा कश्चन अपि जनः जन्मनः प्रतिभाशाली

**शेषभागःद्वितीयपुटे**

## गंगा निर्मलं न भवेत् तर्हि आन्दोलनं भविष्यति -स्वामी जितेन्द्रानन्द

नवदेहली। गंगायाः अविरल प्रवाह एवं तां निर्मलं निर्माणस्य व्रतं घृत्वा देहल्याम् एकत्र संत-समाजः असन्तोषः व्यक्तवान्।



गंगामहासमायाः महामंत्री दंडीस्वामी जीतेन्द्रानन्द उक्तवान यत् नवनिर्मित सर्वकारं सार्ध त्रीवर्षं व्यतीतं परञ्य गंगा स्वच्छता विषये यो आश्वासनं दत्तवान सः पूर्णः नाभवत्। एतादृशी स्थितीषु सः श्रान्तो भुत्वा न उपविष्यति। सर्वकारं 18 मार्च पर्यन्त समयं दत्तवान्, परञ्च तदुपरान्त सम्पूर्ण देशे जनआन्दोलनम् आरम्भो भविष्यति।

इयं सूचना स्वामीजीतेन्द्रानन्दसरस्वती स्व पक्षतः आयोजित गंगारक्षासम्मेलने दत्तवान। ते प्रधानमन्त्री मोदीमहोदयं आशायाः अन्तिमं किरणंमुक्तवान। ते संसद मध्ये अविलम्ब गंगासंरक्षणनियम प्रस्तौतुं निवेदनं कृतवान। सम्मेलने मदनमोहनमालविय महोदयस्य पौत्र एवं सेवानिवृत न्यायमूर्ति गिरधरमालवियः गंगायाः। स्थित्यां चिन्ता व्यक्तवान्। सम्मेलने राष्ट्रिस्वयंसेवकसंघस्य नेता इन्द्रेशकुमार उक्तवान यत् राममन्दिरस्यापि शीघ्रं निर्माणं भविष्यति एवं गंगा अपि स्वच्छ शीघ्रं भविष्यति। गंगारक्षासम्मेलनं प्रयागपीठाधीश्वर स्वामी वशुदेवानन्दसरस्वती, स्वामी हंशदेवाचार्यः एवं किन्नर परिषदस्य महामण्डलेश्वर लक्ष्मीनागयणत्रिपाठी अपि सम्बोधितं कृतवती।

## माता, मातृभाषा एवं मातृभूमी मा विस्मृतव्यम्-उपराष्ट्रपति

नवदेहली। अस्मान् स्वजीवने माता मातृभाषा एवं मातृभूमि मा विस्मृतव्यम्। वयं कुत्रापि निवसाम अस्मान् अस्मै आवश्यक अस्य वाइसरीगललाँज स्थित कवेंशनसेन्टर इत्यस्थ औपचारिक शुभारम्भ समये व्यक्तवान्। उपराष्ट्रपति उक्तवान यत् भाषा




रुपेण कार्य कर्तव्यम्। विचारोऽयं उपराष्ट्रपति वेंकैयानायडु महोदयः दिल्ली विश्वविद्यालयस्य नवनिमिंत दिल्लीस्कुलऑफजर्नलिज्म एवं भावनाः परस्पदं गच्छति। वास्तेवे भाषा अस्माकं संस्कृति

**शेषभागःद्वितीयपुटे**

## आचार्यरमाकान्तशुक्लाय विनायकप्रेरणापुरुषसम्मानः

राजस्थानस्य भीलवाडायां भुणासे भक्तिपुरस्थविनायकविद्यापीठेन प्रथिताय संस्कृतकवये आचार्यरमाकान्तशुक्लाय विनायकप्रेरणापुरुषसम्मानः उपायनीकृतः। तत्रात्यमहाराजस्य शिवदानसिंहराणावतस्य जन्मदिनमुपलक्ष्य 25.12.2017 तमे दिनाङ्के विनायकविद्यापीठनिदेशकेन डा. देवेन्द्रकुमावतेन राजस्थानप्रशासनस्य च मुख्यसचेतकेन कालूलालगुर्जरेण अयं सम्मान आचार्याय समर्पितः। सभायामस्यां सभाध्यक्षत्वेन हिम्मतनगरस्थ ?-निम्बार्कपीठस्य गौराङ्गशरणदेवाचार्यः उपस्थित आसीत्। रामसनेहीसम्प्रदायस्य बालयोगि-तोतारामस्य च सान्निध्यमवर्तत ?। अत्रावसरे श्रीविनोदबब्बरस्य अभिनन्दने डा.देवेन्द्रकुमावत ?-डा.राहुलाभ्यां सम्पादितः 'शिक्षक से लोकशिक्षक' इत्याख्यः अभिनन्दनग्रन्थोऽपि लोकायार्पितोऽभूत्।



# उत्तर प्रदेश संस्कृत संस्थान लखनऊ के 41वें स्थापना दिवस पर वर्ष 2017 के चयनित संस्कृत पुरस्कारों की घोषणा।

**चयनित विद्वानों के नाम, पुरूस्कार राशि का विवरण**

**विश्वभारती पुरस्कार**

| | | स्थान |
|---|---|---|
| डॉ. केशवराव सदाशिव शास्त्री 'मुसलगांवकर' | | |
| पुरस्कार धनराशि- 5,01,000.00 | | उज्जैन |

**महर्षि वाल्मीकि पुरस्कार**

| | | |
|---|---|---|
| डॉ. प्रशस्यमित्र शास्त्री | रू0 2,01,000.00 | रायबरेली |

**महर्षि व्यास पुरस्कार**

| | | |
|---|---|---|
| प्रो0 हरिदत्त शर्मा | रू0 2,01,000.00 | इलाहाबाद |

**महर्षि नारद पुरस्कार**

| | | |
|---|---|---|
| डॉ. जर्नादन हेगड़े | रू01,01,000.00 | बैंगलुरू |

**विशिष्ट पुरस्कार रू01,01,000.00 प्रत्येक**

| नाम | |
|---|---|
| 1. प्रो0 फूलचन्द्र जैन ''प्रेमी'' | वाराणसी |
| 2. डॉ. राकेश शास्त्री | मेरठ |
| 3. प्रो0 राजाराम शुक्ल | वाराणसी |
| 4. प्रो0 गोपबन्धु मिश्र | वाराणसी |
| 5. डॉ. सुरेन्द्र पाल सिंह | इलाहाबाद |

**नामित पुरस्कार- रू0 51,000.00 प्रत्येक**

| पुरस्कार नाम | पुस्तक का नाम | |
|---|---|---|
| **कालिदास पुरस्कार-** | | |
| डॉ. बलराम शुक्ल | परीवाहः | गोरखपुर |
| **बाणभट्ट पुरस्कार-** | | |
| डॉ. एच0 आर0 विश्वास | उल्लंघनम् | मंगलूरू, कर्नाटक |
| **पाणिनी/सायण पुरस्कार-** | | |
| डॉ. दिनेश कुमार द्विवेदी | कारकसिद्धान्तसमीक्षणम् | जौनपुर |
| **शंकर पुरस्कार-** | | |
| डॉ. अंजना शर्मा | अद्वैतसिद्धान्तविमर्शः | जयपुर |

**वेद पण्डित पुरस्कार धनराशि 51,000.00 प्रत्येक**

| क्रम | नाम | |
|---|---|---|
| 1 | श्री शिव मूरत तिवारी | लखनऊ |
| 2 | श्री शिव नारायण शुक्ल | जौनपुर |
| 3 | श्री सिद्धेश कुमार पाण्डेय | वाराणसी |
| 4 | श्री अभिषेक दूबे | वाराणसी |
| 5 | श्री सुनील कुमार उपाध्याय | अम्बेडकर नगर |
| 6 | श्री पद्म भूषण मिश्र | वाराणसी |
| 7 | श्री खिमलाल न्यौपाने | इलाहाबाद |
| 8 | श्री विकास कुमार पाण्डेय | गाजियाबाद |
| 9 | श्री निखिल त्रिवेदी | वाराणसी |
| 10 | श्री एस0 गुरूनाथ घनपाठी | चेन्नई |

**विशेष पुरस्कार- धनराशि रू0 21,000.00 प्रत्येक**

| क्रम | लेखक नाम | पुस्तक का नाम | |
|---|---|---|---|
| 1 | डॉ. धर्मदत्त चतुर्वेदी | सौम्याब्दकाव्यामृतम् | वाराणसी |
| 2 | प्रो0 आजाद मिश्र | व्याकरणसिद्धान्त कौमुदी रत्नाकरः | लखनऊ |
| 3 | प्रो0 उमेश प्रसाद सिंह | ऐतरेब्राह्मणम् | अयोध्या |
| 4 | डा0 गिरिजा शंकर शास्त्री | योगसागरः | इलाहाबाद |
| 5 | डॉ. प्रतिभा आर्या | पाणिनीयसंज्ञाविमर्शः | वाराणसी |
| 6 | डॉ. प्रशस्य मित्र शास्त्री | मामकीनम् गृहम् | रायबरेली |
| 7 | सेतल संघसेनो (संघसेन सिंह) | कब्ब किसलयं | वाराणसी |

**विविध पुरस्कार- रू0 11,000.00 प्रत्येक**

साहित्य पुरस्कार

| क्रम | नाम | पुस्तक का नाम | |
|---|---|---|---|
| 1 | डॉ. मीरा द्विवेदी | कालिदास स्त्री अभिधानमाला | औरैया |
| 2 | डॉ. विनोद कुमार पाण्डेय | अश्रुवीणा का समीक्षात्मक अध्ययन | कानपुर |
| 3 | डॉ. मधुसूदन | सुदर्शनविजयम् | वाराणसी |
| 4 | डॉ. रामकिशोर झा | महाकवि जयदेवप्रणीतम् श्री गीत गोविन्द महाकाव्यम् | इलाहाबाद |
| 5 | डॉ. वत्सला | विचारविन्दवः | वाराणसी |
| 6 | डॉ. पवन कुमार | नैषधीयचरितोपज्ञम् चार्वाकमत विवेचनम् | लखनऊ |
| 7 | डॉ. प्रत्यूषवत्सला द्विवेदी | उत्तररामचरितम् | कानपुर |
| 8 | डॉ. अरविन्द कुमार तिवारी | काव्योद्यानम् | बागपत |
| 9 | डॉ. सुरेन्द्र पाल सिंह | उत्तरप्रश्नम् | इलाहाबाद |
| 10 | डॉ. जगदीश प्रसाद शर्मा | संस्कृत मनीषी आचार्य शारदा चरण दीक्षित | मथुरा |
| **शास्त्र पुरस्कार** | | | |
| 11 | डॉ. शीतला प्रसाद पाण्डेय | पांचरात्र-आगम-तन्त्र | वाराणसी |
| 12 | डॉ. शिवशंकर त्रिपाठी (सम्पादक) | अभिनय चन्द्रिका | इलाहाबाद |
| 13 | प्रो0 वागीश दिनकर | श्रीभार्गवराघवीयम् मीमांसा | हापुड़ |
| 14 | प्रो0 उमारमण झा | सौन्दर्यलहरी | लखनऊ |
| 15 | डॉ. सुरेन्द्र कुमार शर्मा | पद्यपाणिनीयम् | जयपुर |
| 16 | डॉ. सुरेन्द्र कुमार पाण्डेय | न्यायाधिपति ग्रह शनि एक समग्र विवेचन | इलाहाबाद |
| **श्रमण पुरस्कार** | | | |
| 17 | डॉ. ज्ञानादित्य शाक्य | नाम रूप समास | गौतम बुद्ध नगर |
| 18 | डॉ. राहुल अमृतराज | आधुनिक भारत में पालि साहित्य के पुनरूद्धारक भिक्षु जगदीश कश्यप | लखनऊ |

प्रथमपुटस्य शेषभागः

## विद्यापीठे सम्पन्ना 21....

न भवति तस्य जनस्य संस्कारपरिवर्तनाय 21 दिनानि अपेक्षितानि भवन्ति एषा कार्यशाला अपि 21 दिनानि यावत प्राचलत् निश्चयेन अस्याः कार्यशालायाः यल्लक्ष्यमासीत् तत् पूर्णं जातं स्यादिति ।कार्यक्रमस्य अस्य अनुभववक्तव्ये लोकेश महोदयेन अपि च अमित शर्ममहाभागेन स्वकीयं मतं प्रस्तुतीकृतम् ।कार्यक्रमे प्रतिवेदनं प्रतिवेदयन्ती अधिगमकेन्द्रस्य संयोजिका डा. अमितापाण्डेयभारद्वाजेन उक्तं यत् अस्मिन् कार्यक्रमे आहत्य 84 सत्रेषु 40 प्रतिभागिनः प्रतिभागं निरूढवन्तः तेषु महाविद्यालयस्य अध्यापकाः, संस्कृत-अध्यापकाः, प्राथमिकशिक्षकाः अन्ये च शोधच्छात्राः आसन् ।कार्यक्रमस्य प्रतिपुष्टिरपि प्रतिभागिभिः आनलाइन कृतम् यस्य परिणामः अत्युत्तम् आसीत् । प्रतिवेदनान्ते क्रियात्मकसत्रस्य विवरणपुस्तिका साक्ष्यरूपेन स्थापितवती । तदनन्तरं कार्यक्रमस्य मुख्यातिथिः स्वकीये वक्तव्ये न्यगादीत् यत् शिक्षकेषु तावत् सामर्थ्यं स्यात् ते वक्तुं शक्नुयुः यत् 'अहं शयनं करोमि तदा राष्ट्रं शयनं करोति, अहं जागर्मि तदा राष्ट्रं जागर्ति, अहं चलामि तदा राष्ट्रं चलति ।' अन्ते कार्यक्रमस्य समापनं शान्तिमन्त्रेण अभवत् ।

प्रथमपुटस्य शेषभागः

## माता, मातृभाषा एवं मातृभूमी मा....

एवं परम्पर्या सह सम्बन्धिता भवति ते देशस्य सर्वा क्षेत्रीयभाषां भारतीयभाषा उक्तवन्तः। ते हिन्द्याः महत्वे प्रकाशं दत्वा उक्तवन्तः यत् हिन्द्या विना देशे प्रगति नास्ति।

अस्मिन्नवसरे दिल्लीविश्वविद्यालयस्य कुलपति प्रो. योगेशकुमारत्यागी उक्तवान यत् ''डीयु'' देशस्य प्रथमं विश्वविद्यालयम् अस्ति यो पत्रकाारितायां पञ्चवर्षीय संयुक्तपाठयक्रमस्य आरभ्यम करोत्। तत्रैव स्कुलऑफजर्नलिज्म विश्वस्य प्रथमं विभागयस्ति येषु बहु वैश्विकी भाषाः सहित भारतीयभाषा अपिअस्ति। अस्माकं लक्ष्यमस्ति यत् वयं विश्वस्य सवंश्रेष्ठं पत्रकारं निर्मातुं शक्नुमः।

विदितोऽस्ति यत् दिल्ली विश्वविद्यालये प्रथमं केवलं आँग्लभाषायामेव इदं पत्रकारितायाः पाठयक्रमः आरम्यमानः आसीत् परञ्च प्रसिद्ध पत्रकार एवं राष्ट्रपति नामित सदस्य समबहादुररायस्य हस्तक्षेपात् हिन्दी माध्यमेऽपि पत्रकारिताः पाठयक्रमः आरम्भ अभवत्।

# गीतां पठन्तु, संस्कारवन्तो भवन्तु – उपाध्यक्षः हरियाणा संस्कृत अकादमी

वार्ताहरः गौरीशः हरियाणा। हरियाणा संस्कृत अकादमी पञ्चकूला अद्य पौष शुक्ल चतुर्थी संवत् 2074 तदनुसारं दिनांक 22/12/2017 शुक्रवासरे तुलसी महोत्सवे गुरुग्रामस्थ राजकीय उच्च विद्यालये नखड़ोलायाम् 'नगरे नगरे भगवद्गीता, जने जने संस्कारः' इति कार्यक्रमम् आयोजितवती।



कार्यक्रम स्वयं संयोजिका डॉ इन्दु राव आसीत। कार्यक्रमेस्मिन्

नीरू राव ,सरपंच श्रीमतीसंजम, सुलेखा, सावित्री,भारती, पूजा , तपस्विनी व लक्ष्मण प्रभृतयः शिक्षाविशारदाः सभ्याश्च नागरिकाःसमुपस्थिताः आसन। अस्मिन्नवसरे डॉ श्रेयांश द्विवेदी उपाध्यक्ष हरियाणा संस्कृत अकादमी, पञ्चकूला मुख्यातिथिः स्वीयोद्बोधने छात्रजीवने महत्वमादाय संस्कार विषयकसमुद्बोधनेन व्याख्यानेन सभाओं सनाथीकृतवन्तः। तेन छात्रेभ्यः श्लोकानां कण्ठीकरणविधा प्रदत्ता। अस्मिन्नवसरे छात्रैः श्लोकाः कण्ठस्थीकृताः श्राविताश्च।



# वैदिकज्ञानस्य व्यावहरिकपक्षाणां प्रासंगिकता

## बृहत्तर-वैदिक-अध्ययन-परिषदा समायोजितम् एकविंशतितम-राष्ट्रियसम्मेलनम

डॉ. रणजित बेहेरा
(एसोसिएट प्रोफेसर, संस्कृतविभागः, दिल्ली-विश्वविद्यालयः)

'वैदिकज्ञानस्य व्यावहारिक-पक्षाः' इति विषयमवलम्ब्य बृहत्तर-वैदिक-अध्ययन-परिषदा(WAVES)प्राच्यविद्याकेन्द्रम्, भारतीयविद्याभवनम्, नवदेहली तथा हरियाणा-विकास-बोर्ड इत्यनयोः संस्थानयोः संयुक्ततत्त्वावधानेन एकविंशतितम-त्रिदिवसीय-राष्ट्रियसम्मेलनं 10.12.2017 तः 12.12.2017 यावत् नवदेहलीस्थ-भारतीयविद्याभवनस्य मुंशी-मेमोरियल-सभागारेसाफल्येनसमायोजितम्।

सप्तदशोत्तर-द्विसहस्रतमवर्षस्य दिसम्बरमासस्य दशमदिनांके प्रातः दशवादने वैदिकविद्वद्भिः अतिथिभिश्च दीपप्रज्ज्वालनेन सम्मेलनमेनत्प्रारब्धम्। दिल्ली-विश्वविद्यालयस्य शोधच्छात्राभ्यां नीतीशसचिनाभ्यां वैदिकमंगलाचरणं तथा कमला-नेहरू-महाविद्यालयस्य छात्राभिः लौकिकमंगलाचरणं विहितम्।



प्रो. रामविलासशर्मा, शिक्षामन्त्री, हरियाणा




आमन्त्रिताः विशिष्टाः वक्तारः

'वाइडरएसोसिएशनफार्वैदिकस्टडीज'(WAVES) इत्यस्याः संस्थायाः अध्यक्षा प्रो. शशितिवारीमहोदया सम्मेलनविषयोपस्थापनेन साकमेव समेषामतिथीनां विदुषां प्रतिभागीनाञ्च स्वागतं व्यदधात। तया उदीरितं यत्सम्मेलनस्य विषयोऽसौ साम्प्रतिके समाजे महत्त्वपूर्णो वर्तते। वैदिकव्यावहारिक-ज्ञानेनैव नरः सुखमवाप्तुं शक्ष्यन्ति। मुख्यातिथिपदमलंकुर्वताराष्ट्रिय-संस्कृत-संस्थानस्यकुलपतिनाप्रो. परमेश्वरनारायण-शास्त्रिमहोदयेननिगदितंयत्वैदिकमन्त्राः सस्वरमुच्चारणीया इति। विश्वस्मिन् विश्वे सुख-शान्त्यवाप्त्यै वैदिकज्ञानं संप्रयोजनीयम्। बृहत्तर-वैदिक-अध्ययन-परिषद उपाध्यक्षः प्रो. भास्करनाथभट्टाचार्यवर्यः प्रावोचत् यत् वयं सर्वे समाना तथा च वैदिकज्ञानिनो वास्तव्येन योगिन एव। विशिष्टातिथित्वेनावर्तत सोफिया-विश्वविद्यालयस्यक्लासिकल-ईस्ट-विभागस्याध्यक्षा प्रो. मलिना ब्राटोवामहोदया। तयोक्तं यत् भारतीयविद्या उत्तमजीवनायापरिहार्या। पुनश्च विशिष्टातिथिपदमलंकुर्वता जामिया-मिल्लिया-इस्लामिया-विश्वविद्यालयस्य सस्कृतविभागस्य संस्थापकाध्यक्षेण प्रो. गिरीशचन्द्रपन्तमहोदयेन निगदितं यत् वेदांगानि वैदिकव्यावहारिकज्ञानार्जने सहायकसिद्धान्येव। भारतीयविद्यायाः प्रचारप्रसाराय भारतीयविद्याभवनं नितरामभिनन्दनीयम्। सम्मेलनस्यास्योद्घाटनसत्रस्य मुख्यवक्ताऽऽसीत् उत्तराखण्डस्थ-राष्ट्रिय-संस्कृत-संस्थान-रघुनाथकीर्ति-परिसरस्य प्राचार्यः प्रो. के. बी. सुब्बराय्यडुवर्यः। सोऽब्रवीत् यत् भारतीयवैदिकसंस्कृतिपरम्परायाः मानवजीवनेन साकं महान् सम्बन्धो विद्यते। सम्मेलनस्यास्योद्घाटनसमारोहस्याध्यक्ष्यमलंकृतवान् नवदेहलीस्थ-भारतीय-विद्या-भवनस्यनिदेशकः श्रीयुतःअशोकप्रधानः। अध्यक्षमहोदयेनोपस्थापितं यत् प्राचीनभारतीयशिक्षा युनः आत्मविश्वासाय गौरवभानायै अनुशासनाय च सर्वदैव प्रेरयति। भारतीय-विद्या-भवनस्य प्राच्यविद्याकेन्द्रस्य अध्यक्षा तथा सम्मेलनस्यास्य संयोजिका प्रो. शशिबालामहोदया धन्यवादवचांसि व्याहरत। उद्घाटनसत्रावसरे अतिथिभिः सम्मेलनस्य स्मारिका लोकायार्पिता यस्यां 173 शोधपत्राणां सारांशिकाः प्रकाशिताः। वेव्स-सचिवेन डॉ. रणजितबेहेराद्वारा हिन्दी-संस्कृत-आंग्ल-भाषाभिः उद्घाटनसत्रमिदं साफल्येन सञ्चालितम्।

त्रिदिवसीय-राष्ट्रियसम्मेलनेऽस्मिन्भारतस्यविभिन्नेभ्यःप्रदेशेभ्यःतथाविदेशेभ्यः200 विद्वांसः भागंगृहीतवन्तः। विविधेभ्यः विश्वविद्यालयेभ्यः विविधाभ्यः संस्थाभ्यश्च अध्यापकाः युव-शोधार्थिनश्च भागमवहन्, तद्यथा ङ्क दिल्ली-विश्वविद्यालयः, दिल्ली; जवाहरलाल-नेहरू- विश्वविद्यालयः, दिल्ली; अलीगढ़-मुस्लिम-विश्वविद्यालयः, अलीगढम्; गोवाहाटी-विश्वविद्यालयः, गोवाहाटी; उत्तराखण्ड-सस्कृत- विश्वविद्यालयः, हरिद्वारम्; श्री लालबहादुरशास्त्रि-संस्कृत-विद्यापीठम्, दिल्ली; उत्तर-पूर्वी-हिल- विश्वविद्यालयः, शिलांगः; रवीन्द्र-भारती-विश्वविद्यालयः, कोलकाता; राष्ट्रिय-संस्कृत-संस्थानम्, दिल्ली; जीवाजी- विश्वविद्यालयः, ग्वालियरम्; इलाहाबाद- विश्वविद्यालयः, इलाहाबादम्; बनारस-हिन्दू- विश्वविद्यालयः, वाराणसी; वनस्थली-विद्यापीठम्, राजस्थानम्; गुरुकुल-कांगडी-विश्वविद्यालयः, हरिद्वारम्; मुम्बई-विश्वविद्यालयः, मुम्बई; श्री शंकराचार्य-संस्कृत-विश्वविद्यालयः, केरलम्; इंस्टीट्यूट ऑफ एडवांस्ड साइंसेज, डार्टमाउथ, यूएसए प्रभृतयः।

सम्मेलनेऽस्मिन् प्रामुख्येन केचन सत्राध्यक्ष्य-संयोजक-पत्रवाचकरूपेणावर्तन्त, तद्यथा- डॉ. भक्तिनिष्कामशान्ता, बैंगलोरम्; डॉ. भक्तिविज्ञानमुनिः, बैंगलोरम्; डॉ. शिल्पी सक्सेना, दिल्ली; श्री तुषारमुखर्जी, मुम्बई; डॉ. आशारानी त्रिपाठी, लखनऊ, प्रो. रामसेवकदूबे, इलाहाबादम्; डॉ. राधेश्यामकौशलः, दिल्ली; डॉ. सत्यमूर्तिः, दिल्ली; प्रो. रमेशचन्द्रभारद्वाजः, डॉ. रामगोपालः, जोधपुरम्;



डॉ. अनीतखुराना, अजमेरम्; डॉ.नन्दिता सिंघवी, बीकनेरम्; प्रो. शारदा शर्मा, दिल्ली; श्री विद्यासागरवर्मा, दिल्ली; प्रो. सुधीरकुमारः, दिल्ली; डॉ. उर्मिलरुस्तगी, दिल्ली; डॉ. प्रवेशसक्सेना, दिल्ली; डॉ. मैत्रेयी शर्मा, असमः; डॉ. वेदवती वैदिक, गुरुग्रामः; डॉ. पंकजमिश्रः, दिल्ली; डॉ. अंजूसेठ, दिल्ली; प्रो. शकुन्तला पुंजानी, दिल्ली; डॉ. ललिता कुमारी जुनेजा, फरीदाबादः; डॉ. प्रतिभाशुक्ला, हरिद्वारम्; डॉ. अजयझा, दिल्ली; डॉ. सुषमा चौधरी, दिल्ली; प्रो. दिनेशचन्द्रशास्त्री, हरिद्वारम्; डॉ. आशालता पाण्डेय, दिल्ली; डॉ. सरोजगुलाटी, दिल्ली; डॉ. वन्दना एस. भान, दिल्ली; डॉ. डॉली जैन, वनस्थली; डॉ. आर. डी. सुनिलकुमारः, कालाडी, केरलम्; प्रो. एम. एम. बजाजः, दिल्ली; डॉ. विजयशंकरद्विवेदी, दिल्ली; डॉ. करुणा आर्या, दिल्ली।

सम्मेलनेऽस्मिन्नष्टादश-शैक्षिक-सत्रेषु द्वादश-समसत्राणि, पूर्णसत्रत्रयं, एकं स्वतन्त्रसत्रञ्चावर्तन्त। पूर्णसत्रस्य प्रमुखवक्तारः तेषां विषयाश्चेमे सन्ति-

1. डॉ. भक्तिनिष्कामशान्ता, सचिवः, श्री चैतन्य-सारस्वत-संस्था, बैंगलोरम, कर्णाटकम् (विषयः - Scientist is Still a Scientific Mystery: E&ploring the Limits ofMechanistic E&planation in the Light of BhagavatVedanta Conception)

2. डॉ. भक्तिविज्ञानमुनिः, अध्यक्षः, श्री चैतन्य-सारस्वत-संस्था, बैंगलोरम्, कर्णाटकम् (विषयः - Towards a more Harmonious Concept through the Synthesis of Vedanta andScience)

3. डॉ. शिल्पी सक्सेना, प्रगत-अध्ययन-केन्द्रम्, दिल्ली-विश्वविद्यालयः, दिल्ली (विषयः - Scientific Critique ofthe Darwinian Illusory Concept of Evolution and Mechanistic View of Life)

4. डॉ. एम. डी. थॉमस, निदेशकः, हर्मनी एंड पीस इंस्टीट्यूट, दिल्ली (विषयः - कबीर के समन्वय-वाद पर वेद का प्रभाव)

5. डॉ. सत्यमूर्तिः, जवाहरलाल-नेहरू-विश्वविद्यालयः, दिल्ली (विषयः-Research Methodology in The Sastric Tradition ofSanskrit)

6. प्रो. मलिना ब्राटोवा, सोफिया-विश्वविद्यालयः,बुल्गारीया (विषयः - Mandu-kyopanisadin the Perspective of the Contemporary Speech-Act Theory)

7. डॉ. महेशमाहेश्वरी, डॉ. प्रसन्नचन्द्रगौतमः, दिल्ली (अनुवादकौ सम्पादकौ च- ऋग्वेदः यथार्थ अनुवाद, भाग- 2; परिचयः लोकार्पणञ्च)

8.डॉ. कान्ता भाटिया, उपाध्यक्षा, दिल्ली संस्कृत अकादमी, दिल्ली (विषयः - वैदिक गणित की व्यावहारिक उपयोगिता)

9. प्रो. आर. पी. सिंहः, जवाहरलाल-नेहरू-विश्वविद्यालयः, दिल्ली (विषयः–OnEducation in Vedas: Practical - Integral Approach)

10. प्रो. भास्करनाथभट्टाचार्यः, रवीन्द्रभारती-विश्वविद्यालयः, कोलकाता (विषयः -AyurvedicComponents in the SatapathaBrahmana)

सम्मेलनस्य प्रथमदिवसे हरियाणा-सरस्वती-बोर्डद्वारा 'वैदिक सरस्वतीः हमारी विरासत' इति विषयमाधारीकृत्य स्वतन्त्रसत्रमायोजितम्। सत्रेऽस्मिन् मुख्यातिथिपदमलंकृतवान् हरियाणासर्वकारस्य शिक्षामन्त्री माननीयः प्रो. रामविलासशर्मवर्यः। सत्रस्यास्याध्यक्षता कृता 'हरियाणा-सरस्वती-बोर्ड' इत्यस्योपाध्यक्षेण श्रीयुतेनप्रशान्तभारद्वाजेन। दिल्ली-विश्वविद्यालयस्य पूर्वाचार्या तथा वेव्ज(WAVES) इत्यस्याः संस्थायाः अध्यक्षा प्रो. शशितिवारीमहोदया सत्रमिदं सकुशलं सञ्चालितवती। वैज्ञानिकाः, संस्कृतविद्वांसः, ऐतिहासिकाः पुरातत्त्वविदश्चात्र व्याख्यानार्थं सादरमामन्त्रिताः, येषु प्रमुखाः वर्तन्ते-

1.डॉ. ए. के. गुप्ता, सदस्यः, हरियाणा सरस्वती बोर्ड, हरियाणा तथा पूर्ववैज्ञानिकः, इसरो।

शेषभागःपंचमपुटे

# सम्पादकीयम्

मान्याः! अमरवाणीसंरक्षणतत्पराः सरसा विद्वांसः!

सकलज्ञानविज्ञानकलाकोषवती सुरभारती विदेशेषु महीयते इति ज्ञात्वा मोमुद्यते चेतः। सततं कविजनलिख्यमानकाव्यानि कोविदजनरच्यमाननिबन्धाः विबुधजनसंवाच्यमानलेखाः सुधीजनश्रूयमाणव्याख्यानानि सम्प्रति सर्वेषामपि मनोमोहयन्तीवेति नातिचित्रम्। अहह! स्वर्णयुगारम्भः संस्कष्तभाषाया इति मन्यते। सद्य एव लक्ष्मणपुरे संस्कृतज्ञैः जनपदसंस्कष्तसम्मेलनं समायोजितं यद् दर्शं दर्शं सम्पूर्णोऽपि संसारो नन्दतीवेति वक्तुं शक्नुमः। अयमवसरः एव विज्ञापयति यत्संस्कृतदिवसा रमणीयाः। सुरभारतीविद्यामन्दिरसमर्चकाः साधकाः! नायं कालो वर्तते सुखं शयनायेति वयं जानीमः। स्मरन्तु भवन्तः काश्याः प्रथितकीर्तेः गुरुवरस्य आचार्यस्य वासुदेवद्विवेदिशास्त्रिणो वचनानि यानि तत्प्रणीतसुरभारतीसन्देशे लब्धानि–

कालेऽस्मिन् निजदेशजातिविषये कर्णे पिधायांगुलीः<br>नेत्रे चापि निमिल्य वाचि निपुणं दत्त्वा दष्ढामर्गलाम्।<br>श्रीमन्तो यदि शेरते सुखमये शय्यातले पण्डिताः<br>स्वं देशं प्रति भो भवेदयमहो विश्वासघातो महान्।।

सार्वभौमसंस्कृतसंस्थानस्य संस्थापको विश्वगुरुरयं संस्कष्तभाषाविषये वक्ति–

शब्दार्थावगमैकमासफलदां क्लेशप्रदां प्रायशो<br>विद्याबुद्धिवचोविवेकविमलद्वारे दष्ढामर्गलाम्।<br>एतां शिक्षपद्धतिं प्रचलितां निक्षिप्य दूरे द्रुतं<br>ग्राह्या बुद्धिविकासनीयमधुना वैज्ञानिकी पद्धतिः।।

अतोऽहं परामृशामि भवद्भिः सर्वैरपि काचिन्नव्या वैज्ञानिकी संस्कष्तशिक्षणपद्धतिराविष्करणीया, यया अमरवाणीयं पुनरपि दिशि दिशि श्रुतिपथमागच्छेदिति कामये।

## वेदामृतम्

**( ऋग्वेदभाष्यम् )**

(प्रथमाष्टकः प्रथमोऽध्यायः तृतीयोऽनुवाकः)

**यः कुक्षिः सोमपातमः समुदइव पिन्वते ।**<br>**उरायो न काकुदः ।। 7 ।।**

अर्थ–इस मन्त्र में दो उपमालङ्कार हैं । ईश्वर ने जैसे जल को स्थिति और वृद्धि का हेतु समुद्र तथा वाणी के व्यवहार का हेतु प्राण बनाया है, जैसे ही सूर्यलोग वर्षा होने, पृथिवी के खाँचने प्रकाश और रसविभाग करने को हेतु बनाया है, इसी से सब प्राणियों के अनेक व्यवहार सिद्ध हैं। 7 ।।

उक्त अर्थों के लिए और अयं का प्रकाश अगले मन्त्र में किया है।

**एवा ह्यस्य सूनृता विशी गोमती मही।**<br>**पक्वा शाखा न दाशुषे ॥8॥**

अर्थ–इस मन्त्र में उपमालङ्कार है। जैसे विविध प्रकार से फल-फूलों से युक्त आम और कटहर आदि वृक्ष नाना प्रकार के फलों के देनेवाले होके सुख देनेहारे होते हैं, वैसे ही ईश्वर से प्रकाश को हुई वेदवाणी बहुत प्रकार को विद्याओं को देनेहारी होकर सब मनुष्यों को परम आनन्द देनेवाली है। जो विद्वान् लोग इसको पढ़के धर्मात्मा होते हैं, वे हो वेदों का प्रकाश और पृथिवी में राज्य करने को समर्थ होते हैं॥8॥

जो मनुष्य ऐसा करते हैं, उनको क्या सिद्ध होता हैं, सो अगले मन्त्र में प्रकार किया है

एवा हि ते विभूतय ऊतय इन्द्र मावते।<br>सद्यश्चित् सन्ति दाशुषे ॥9॥

अर्थ–इस मन्त्र में लुप्तोपमालङ्कार है। ईश्वर की आज्ञा का प्रकाश इस रीति से किया है कि–जब मनुष्य पुरुषार्थों होके सबका उपकार करनेवाले और धार्मिक होते हैं, तभी वे पूर्ण ऐश्वर्य और ईश्वर की यथायोग्य रक्षा आदि को प्राप्त होके सर्वत्र सत्कार के योग्य होते हैं ।। 9।।

उक्त सब प्रशंसा किस को है, सो अगले मन्त्र में प्रकाश किया है–

**एवा ह्यस्य काम्या स्तोम उक्थं च शंस्यां ।**<br>**इन्द्राय सोमपीतये ।। 10 ।।**

अर्थ–जैसे इस संसार में अच्छे-अच्छे पदार्थों की रचना विशेष देखकर उस रचनेवाले की प्रशंसा होती है। वैसे ही संसार के प्रसिद्ध अत्युत्तम पदार्थों तथा विशेष रचना को देखकर ईश्वर ही को धन्यवाद दिये जाते हैं। इस कारण से परमेश्वर की स्तुति के समान व उससे अधिक किसी की स्तुति नहीं हो सकती ॥ 10 ॥

इस प्रकार जो मनुष्य ईश्वर की उपासना और दीक्त कर्मों के करनेवाले हैं, वे ईश्वर के आश्रित होके दि विद्या से आत्मा के सुख और उत्तम क्रियाओं से गरीर के सुख को प्राप्त होते हैं, वे परमेश्वर ही की प्रशंसा करते रहे। इस अभिप्राय से इस आठवें सूक्त के अर्थ की पूर्वोक्त सातवें सूक्त के अर्थ के साथ सङ्गति जाननी वाहिए।

यह आठवाँ सूक्त और सोलहवाँ वर्ग समाप्त हुआ।

।धन जल और अग्नि का। वर्णन अगले मन्त्र में किया है–

# शब्दकर्मधातूनां यथारुपस्तथा प्रयोगे प्रयत्नो चिन्तनञ्च

**–रोहित**<br>शोधाच्छात्रः,<br>दिल्ली विश्वविद्यालय, दिल्ली

इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम्।<br>यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ।

मात्रेणैवानेनैव वचनेन स्फुटं यच्छब्दात्मकं संसारं शब्दप्रकाशितेऽर्थे सुखमनुभवति चेतो लोकश्चापि। मनोऽवस्थितचेतसाऽभिप्राये निहिते सत्येव फलदायको भवति। विषयमिमं विशदतया भाष्यकृता फणिपतिनाऽऽष्टकाख्यानाह्निकपस्पशायां ‘त्रयोदशात्मके संख्यात्मके शब्दानुशासनानां गौणप्रयोगे व्याख्यातं हि । सामान्यतः शब्देन व्यवहारः लोके प्रतिव्यक्तिभिन्नतायाः परिचयाह्वानव्यापारप्रयोगात्मिकः, यथा कश्चिद् रामादितरत् समानाकृतिमानुषमाकारयितुमीहते तस्यामवस्थायां सः ‘ओये,ओ, अरे’ इत्यादिभिरनेकैरसभ्यापशब्दप्रयोगैर्न शक्नोति तमाह्वानम् ,तेन यदि समानायामप्याकृतिवर्णाश्रयं व्यक्तिं ‘रमेशः’ इति नामापरेण आह्वयेत तर्हि व्यवहारे सारल्यं स्यादेव।

अस्माकं संस्कृतौ नाम्नः नामकरणस्य वा या पूर्वजाभिमता परम्परा राजते तस्याः महत्वं न केवलं लोकव्यवहारप्रसंग एव प्रत्युतः नाम्ना तस्य-तस्य प्रतिव्यक्तेः व्यवहारस्य पूर्वानुमानमपि मीयते स्म । मनोवैज्ञानिक्या चिन्तनशैल्या काले मासे नक्षत्रे च जनितस्य शिशोरायुषः कर्मश्रमस्वास्थ्यानामपि विषयो व्याख्यायते स्म।

इदानीन्तु परम्परामिमामुपहसन्ति पाश्चात्यविचारधाराप्रवाहवाहिन्यां निवसन्तो जनाः।

शब्दस्य शब्दयोः शब्दानां वा प्रयोगविषयः संदर्भानुकूल एव प्रशस्यो भवति तदेतज्ज्ञानं लोके मध्यम-उत्तमवृद्धव्यवहारेण जायते। शब्देन शब्दाभ्यां शब्दैर्वा शब्दाः न कथ्यन्ते अतः अर्थप्रामुख्यं पुरस्कुर्वता जनेन संदर्भानुकूलशब्द एव प्रयोक्तव्यः। कमप्यर्थप्रदं शब्दं न जानन्यदि कोऽपि प्रयुङ्क्ते चेत्तद् हास्यास्पदं भवति,अथापि कोऽप्यन्यः कमप्यर्थप्रदं शब्दं न जानन्यदि प्रयोक्तारमुपहसति सोऽपि खिन्नचेतः खिद्यते कालात्परेण। एवं कः शब्दः प्रयोक्तव्यः? को वाऽभिप्रायविशेषः प्रयोक्तुरिदं मनीषया विज्ञाय एव व्यवहारः स्यात् ।

अथ विषयाभिमुखं यामः। पाणिनिना संगृहीताः धातवः 2000 परिमितास्सन्ति तेषु च शब्दकर्मधातवः 196 सन्ति। इमे संगृहीताः धातवः व्यक्तवाचि अव्यक्तवाचि शब्दार्थाः शब्दे क्रन्दने आह्वानादिषु चान्यसंकेतितार्थेषु दृश्यन्ते। प्रायेण हि संस्कृतधातुभिः कृतसंज्ञकाः वस्तुपदार्थाः अन्वर्थरुपा एव ,यथाह यास्कः– नद्यः कस्मात्? नदना इमा शब्दवत्यः । एभिः धातुभिः साहित्यस्य महदुपकृतफलित इति लक्ष्यते, कथञ्चेज्जिज्ञासितं श्लोकमिममवलोकयामः–

पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः।<br>षष्ठं गुरुः विजानीयात् एतदनुष्टुपलक्षणम् ।।

अनेन विधिना पुष्टः श्लोक एव अनुष्टुप् च्छन्दे स्तूयतेऽन्यभ्रष्टलक्षणस्तु गर्ह्यत एव । व्याकरणशास्त्राभिमतं ‘संयोगे गुरु ’ इत्येव इहापि तेन ‘भर्त्सितः,तर्जितः, प्रयोगाभ्यामुभाभ्यां भवेद्व्यवहारकाव्यशास्त्रविचक्षणैः काव्ये। एषः दृष्टान्तः किल सामान्येन । छन्दानां लक्षणाभिरुपं ‘अनुप्रासादिष्वलंकारेषु रसविपाकविनोदकर्मणे विभिन्नधातूनामस्तित्वे सत्येव संभवति काव्यक्रीड़ा। इमामेव काव्यक्रीडां चिक्रीडिषया मया शब्दकर्मधातूनां प्रयोगाणामल्पयत्नो विहितः , इह प्रयुक्ताः धातवः प्रायेण साहित्ये प्रचुरतया स्फुटञ्च नोपलभ्यन्ते अतो हेतोः भवद्भिरयं यत्नो निपुणं निरीक्ष्य निस्संकोचं समालोचनीयं परिष्काराय भावेषु रसभङ्गक्रमेषु प्रखरप्रतिभाधनिभिर्नूनम्।

अथ भिन्नशब्दकर्मधातूनामयं प्रयोगस्तावत्–

वन्दे काव्यपरम्पराङ्कुरयुतं श्रीवल्मीकाख्यं गुरुम्<br>यस्य श्लोकरपारशोकगहने वृन्दारको मन्दते।<br>प्रातः वन्द्यरनेन रामगदितम्मन्ये खगाः ह्राद्यते<br>सः श्लोकांश अमुं करोतु कृपया ह्लादांशदोषं परे ।।

इह वदि ख्याञ् मदि गद ह्राद ह्लाद चेति षट्कसम्पत्तीव धातुभिरेभिः नानार्थप्रधानभावाः प्रदर्शिताः वर्तन्ते। एत्र अभिवादनप्रकारः तत्र वन्दे (वदि ),यत्र प्रसिद्धिकथनं तत्र आख्यम्(ख्या ),यत्र स्तुत्यर्थः तत्र मन्दते(मदि ),यत्र व्यक्तवाग्विषयः तत्र गदितम्(गद ),अथ अव्यक्तवाचः प्रयोगस्तत्र ह्राद्यते(ह्राद ) चान्ते सैवार्थगतमसारुप्यं तत्र ह्लाद(ह्लाद ) इति स्फुटमेव। काव्ये धातूनां प्रयोगैरिह अभिप्रायः स्पष्टमेव; इमे धातवः पाणिनिमुनिना धातुपाठे संगृहीतास्त एव । अथ तैः धातुभिरीषद्भिन्नार्थकं रुपिमभिन्नत्वमधुनाऽवलोकयामः–

(दीन वर्णनम्)

यथा दीनो क्षुधा क्षुब्धः क्षीजते निर्बलोऽपि यः।<br>सैषा स्थितिस्समस्तानां गिरा भावप्रकाशनैः।।<br>क्रोधावेगविवेकशून्यमनसा हर्षेऽति हर्ष हृदा<br>दुःखाग्नौ ज्वलितो नितान्तगरलश्चित्तं मुहू रोदितैः।<br>भीतश्चेत अशान्तभग्नगतिकःकष्टे कथं क्षीजते?<br>स्थायीभावनिसर्गदेहरचना व्यक्ता गिरा दृश्यते।।(युग्मकम्) ।।

क्षीज अव्यक्ते शब्दे धातुं प्रयुज्य ‘क्षुधा क्षुब्धः क्षीजते ...’ इति अनुप्रासप्रयोगरसविपाकः ,तच्च नान्येन समानार्थकेण शक्यते चमत्कर्तुञ्चेतः।

ततः वीरत्व प्रकाशने –

(वीरत्व प्रकाशनम्)

अत्युत्साहविदग्धमन्युयुवको नेत्रे भृशं रक्तिमे<br>शत्रूणामनिशं निदाघविभवौ हस्तौ स्फुरन्तौ ततः।<br>श्वासोच्छ्वासगतिर्विशेषहृदयःसंयुज्य चोष्ठौ मिथः<br>भण्डेते रपतः पनायत इह ध्वन्यां रसो वीर्यजः।।

इह भण्डेते रपतः पनायतः इति वीरोचितरसविपाके युक्त एव धातुप्रयोगाः परैर्धातुभिः वद् गद ख्याञ् एभिः कृतप्रयोगैरीषद्वा क्षीणरस उत्पद्येत नूनं तेन अयं वरः प्रयोगः।

(अज्ञ-कथा)

ज्ञानभारगुणैर्हीना अज्ञरिक्तकदाचराः।<br>भण्डन्तेऽमण्डिताः लोके निसर्गसर्ग ईदृशः।।

इहापि तदेव ‘भडि परिभाषणे ’ धात्वोः प्रयोगो युक्तो लक्ष्यते यतो विद्वान्तु वदति गदति आख्याति च।

(स्वामि-चर्या सेवके)

शीभते शल्भते भृत्यो याति संयमितेऽमितम्।<br>सामर्ष व्यवहाराणां स्वामिनो सेवकाः वशे।।

(शिशोः दुःखमपाये पिता चर्या)

स्वप्नानन्दनिमग्नकांक्षितफले प्राप्तो मुदा भाविते<br>पर्यङ्कात्पतितशिशशोस्तु रुदितं श्रुत्वा पिता भाषते।<br>पश्य! त्वं तव लालदृप्तशिशुना व्यापादिताः कीटकाः<br>इत्थं नैकविभक्तशल्भवचनैः बालं मुहुश्शीभते।।

अत्र समानार्थको भिन्नरुपात्मकः प्रयोगः प्रशंसायां श्लाघृ धातोरितरः।

(परिवारे जातस्य हर्षः)

मातुरङ्कं परत्र यः सृष्टिरस्तीति चिन्तने।<br>अशक्तस्सः रदागतैः तण्डुलांशैः रपत्यहो।।

इह निसर्गप्रयोगः आदौ बालो लपति अर्थात् लकारं स्फुटं भाषते ततरागतै रदै ‘र’ इति मूर्धन्यकठोरं रपति । अहो! ध्वनिविज्ञानस्य महत्वे मनोवैज्ञानिकं चिन्तनं पूर्वजानाम्।

(भिन्नावस्था भिन्नाकथा)

भिक्षुको याचते भिक्षां भल्लते भ्रष्टधीः भृशम्।<br>नेता शोभति शुम्भति यथावस्था तथा मतिः।।

इह ‘भ’ महाप्राणस्य सुरुचिरः प्रयोगः –...भिक्षां भल्लते भ्रष्टधीः भृशम्’ इतिप्रयोगः। भिन्नावस्थे नराः यथा व्यवहरन्ति तथास्ति वर्णितमिह।

(द्विविधो जनः)

पनायति पणायति व्यवहारे स्तुतौ मतौ।<br>पनायत्यर्चको भक्त्या वणिक्पण्यं पणायति।।

अहो! रचना । अत्र क्रियया प्रारब्धः पद्यः क्रिययैव समाप्तिमगमत्,रचनायामस्यां नकारस्य णकारे परिवर्तितरुपेण भिन्नार्थप्रयोगो दृष्टान्तालंकारे दर्शितः।

(यून आकांक्षा)

साऽवस्था दयिता ममापि भविता स्नेहाश्रया कांक्षते<br>षण्णां त्रित्वयुते विनोदवशगः स्पर्शे सुखं मन्यते ।<br>कन्यां कामयते तयाल्पलपिते पुष्टोऽपि सः क्नूयते<br>क्नूयन्ते मदनेन विद्धहृदयाः सैषा स्थितिः प्राणिनाम्।।

इह यून आकांक्षां ज्ञापयन् ‘क्नूयी ’ इति शब्दकर्मणः प्रयोगः कामुकेन काम्यत इति स्फुटमेव मदनेषुभिः विद्धाः क्नूयन्त एव न तु शब्दायन्ते ।

**शेषभागःपंचमपुटे**

चतुर्थपुटस्य शेषभागः

# शब्दकर्मधातूनां यथारुपस्तथा...

(यथावस्थस्तथाऽऽचारः)

कन्यां कामयते कामी कुलजा कुलचारिणा।
कुसुमायुधबाणेन क्नूयते कामिनो मनः।।

इह यून आकांक्षां ज्ञापयन् क्नूयी इति शब्दकर्मणः धातोः प्रयोगःकामुकेन काम्यत इति स्फुटम्। अपरत्र नैसर्गिकी रचना मदनेन विद्धाः ननु क्नूयन्त एव न तु शब्दायन्ते । अनुप्रासालंकारे प्रयोगः नूनं हार्द्यम् 'ककारस्य'।

(जलं रक्ष्यं जन्तुभिः)

नद्याः तीरविभग्नशाखिन इयं शाखा जले रासते
कल्लोलैनंदति प्रवाहमधुरं स्पर्शे हृदा वर्हते।
त्वत्सिक्तास्तरवो फलन्ति विविधैः मूले मुलस्त्वं भुवः
नास्यन्तामभिरक्षणीयममलं नीरं नरैर्नास्यताम्।।

इह 'जलं रक्ष्यं जन्तुभिः' इतिविषयं रासते वर्हते तदनु च अनुप्रासयुतेन प्रयोगेण ..नीरं नरैर्नासताम् दर्शितो लक्ष्यते।

(यथा रुपस्तथा ध्वनिः)

नासते पेटितः पात्रं वर्हति हर्षितोऽसुखे।
चेतनेषु निजारम्भरचेतनेष्वपि ध्वनिः।।

(हरस्य नृत्ये भीता धरा)

नृत्यारम्भहरात्पदोपहननाद्विक्लन्दतीं बर्हतीम्
विश्लेषैस्तरवो नमन्ति धरणीं वारांनिधिः क्षोभणः।
नद्यः कूलनिपातनेन भयदा नीराश्रयाः जन्तवः
स्तब्धाऽऽकाशविकाशने विघटिते पक्षीगणाः विस्मिताः।।

इह प्रसिद्धस्य धूर्जटेः नृत्यति धरायाः वर्हति इति प्रयोगेण रसविपाको यथारूपः।

(युक्तो नरो हिते हि सः)

दंसयति दयाऽऽकरः वल्हयति परे हिते।
स्खलितो भ्रंशितो लोके माने चीवयते स्वकम्।।

(गर्विता नराः)

दंसयन्ति दलाखिन्नाराधिपत्यं चिकीर्षकाः।
तण्डुलैस्तर्जितास्तुषास्स्खलयन्ति गवां मुखे।।

इह उपरिवर्णितानां धातुनामितरत् भाषार्थकैः 'दसि ,वल्ह ,चीव एतेषां धातूनां प्रयोगो दृष्टान्तालंकारे वर्णितः।

(धनाढ्याः खिद्राश्च नराः)

कांस्या लौहसुवर्णताम्ररचनाः भूमौ निपाते महत्
पारुष्यं स्खलयन्परिक्रमरताश्चाढ्याः भवन्तीदृशाः।
मृत्पात्रं स्खलिते कराद्भुवरधस्तोकं त्वरा शब्दजम्
यल्लोके वलयन्ति दर्पबहुना चित्रं स्थितिः प्राणिनाम्।।

(रणे ध्वनिनिकरः)

रणयन्ति रणे कुन्ताः खड्गैःखड्गाः प्रतिस्वराः।
ध्वनयन्ति धनुर्धराः यमधानीमभीषुभिः।।

इह रणप्रसंगं ब्रूते. तच्च रणयन्ति रणे ..., खड्गैः खड्गाः ..., ध्वनयन्ति धनुर्धराः ... प्रयोगैरनुप्रासरचितम्।

(खिन्नो नरः)

क्वचिदतिविरलाशा विप्रयोगाद्विखिद्रः त्रपयति निजं क्रोधे त्यक्तसङ्गप्रियायाः।
रणयति निजचेतः त्यक्तभोगेऽविरागः हतविधिलसितोऽस्मि क्षुब्धदैवो मदीयः।।

इह 'खिन्नं नरं वर्णयन् ' त्रपयति भाषार्थकेन धातुना त्रपां (लज्जां) द्योतयितुं कामो यत्नः।

(क्षुधार्त्त-कथा)

क्षपां क्षुधा क्षामः क्षपयति विनिद्रोदरहतः
इयत्कालं घूर्णन्नपि मधुनिसर्गा पिबति वाः।
त्रपायां संकोचे निजहनुसकाशं कृततनुः
यथावस्थं नग्नोऽनलजलसमीराश्रयवपुः।।

(दुर्विदग्धो नरः)

उच्छलद्ध्वनयत्यब्धिः नदीनादो मधुकलम्।
क्षपयति स्रवदम्भोः बिन्दुः गर्वे यथा नरः।।

इह महाप्राणस्य प्रयोगः अनुप्रासरचना च मनोहराऽखिला ; क्षपयति प्रयोगेण काव्ये सुपाकः।

अथ कथालक्षणोपेतं दुर्जननिन्दायां शब्दकर्मणधातूनां प्रयोगः-

(दुर्जनाचारः)

रेटते युक्तिदं किञ्चिद् भाषते न सुभाषितम्।
सः मूढो नेदते चान्यान्निसर्गरीदृशःखले।।
अपृष्टो भाषते सोऽयं पृच्छायां रेटतेऽधिकम्।
नित्यं नन्दति नेदते हालाहलं विषावृतः।। (युग्मकम् )

इति युग्मकेन रेटृ णेदृ धात्वोः प्रयोगाः , नित्यं नन्दति नेदते..इत्यत्र चानुप्रासरचना मधुरा।

भावभूतिभिः भूषितं बाल्यं स्मरति-

(बाल्यं स्मरामि मुहुः)

स्मारं स्मारं विगतदिवसाञ्चेतराकर्षास्तान्
वीराणाञ्च प्रथितसुकथां चीयते स्म क्षपायाम्।
माता नीतिग्रथितनिपदां बुन्दते स्म प्रियाणाम्
यातं वृत्तं व्यथितहृदयैः काम्यमानेऽपि दूरम्।।

अत्र चायृ उबुन्दिर् चेत्येतयोः धात्वोः प्रयोगेण मातुस्स्मरति ।

(मूर्खस्यापरिमितता)

बुक्कते रस्यते शुनाऽऽसंदेहे ह्रस्यते बत!
रायति घर्घरामिश्रः स्त्यायताऽपि प्रतिध्वनिम्।।

(भयानको रसःस्वरः)

उत्तुंगे गिरिगर्भवासमुखरैर्दीर्घैर्वितानैर्दृशा
साक्रोशं निजबन्धुभिस्सह रताः पक्षैः मिथः तोदने।
आदौ स्त्यायति झर्झता प्रतिरवः श्रोतुं भवेद्दुष्करः
निष्ट्यायन्ति परस्परं विघटिते घोरो ध्वनिः भीषणः।।

इह बुक्कते रस्यते ह्रस्यते रायति स्त्यायता इति भिन्नरूपप्रयोगैः युक्तप्रयोगः।

(खलोऽभद्रमुख एव)

ह्वयते भाषते किञ्चित् झर्झति जर्जति प्रियम्।
रायति मेशति क्षिप्रं श्वा इव वर्त्तते खलः।।

दुर्जनलक्षणं विशदेन ख्यातः- झर्झति जर्जति रायति मेशति च प्रयोगैः ।

साक्षराऽपि भवन्ति भ्रान्तौ दर्शितुं यत्नः-

(साक्षराः भ्रान्तावपि)

दुःखार्त्तः स्विदति क्षुधः प्रतिपदं श्रव्यं जिगातीव च
अज्ञानात्स्विदति प्रकाशविरते स्थूणा समं पूरुषः।
प्रायेणाविकलेन्द्रियैः कतिपयैश्शब्दाः वृथा वाश्यते
यज्ञस्पष्टचवर्गयोगरचना गान्तस्पदे वाश्यते।।

(अहो! भक्तैस्स्तुतो हरिः)

नित्यं प्रातरुषर्बुधैर्बहुविधैर्दिव्यैः पदैर्दीव्यति
नित्यानन्दनिसर्गरम्यरुचिरं क्नूनाति दुःखं स्वकम्।
नित्योऽसि क्षणिकेन केन विधिना साक्षात्कृतस्त्वं वद!
नित्यं कष्टविदीर्णवाग्भिरनिशं भक्तैस्स्तुतश्शंकरः।।

(नालीकं गोपयितुं शक्यम्)

दीव्यति दीव्यति प्रोक्ते श्लाघितौ तर्जितावुभौ।
कृतवेषार्चकस्याक्षैः पतितैर्दीव्यति स्फुटम्।।

इह नित्यं पदस्य रचना रूचिरा प्रतिपंक्त्यारंभे परश्च दीव्यति दीव्यति प्रयोगाभ्यां स्तुत्यर्थं द्यूतकर्मविहीनं द्योतयितुं यत्नोऽस्ति विहितः। 'क्नूञ्-क्नूनाति 'प्रयोग अपि दुःखं द्योतने युक्तः।

इह रूचिरेण प्रयोगेण प्रत्यक्षीकर्तुं शक्तोऽस्ति विषयः ;दीव्यति -दीव्यति प्रयोगयोः निहितार्थौ वर्णितौ प्राञ्जलभाषया।

(प्रियया तर्जितो नायकः)

स्कन्धे चिह्नक्षतनखकृतं लक्षितस्यास्य वध्वा
पृष्टे व्याजैरनुमितधिया कुन्द्रयन्तं सकोपम्।
प्रत्यागत्य प्रियविरहजं वेदयिष्येति प्रोच्य
साशाः धृष्टस्तवमतिहतैः वञ्चितास्मि क्रमेण।।

इह धृष्टनायको वर्णितः तदत्र कुन्द्रयन्तं(कुद्रि) प्रयोगेणार्थस्य चमत्कारः प्रशंस्यः।

(मधुररसे माधवे धरा )

ग्राम्यारण्यनिवासवृत्तिभिरदो गोपालको मन्दते
प्रातः वन्यविहारकौतुकमनाः जागर्त्ति शीघ्रं गृहे।
क्षिप्रं गोपयताऽन्यबालनिकरैस्सम्मोहितै आगते
श्रीकृष्णो गदयन्नभिन्नरसितै रागे धरा माथुरा।।

अथ बालचरितं गोपयता (गुप) गदयन्(गद) धातूभ्यां ब्रूते मन्ये 'गोपालः' इति गकारपदेनाकारितं रुपसाम्येन धत्वोरनयोः प्रयोगः।

(कीर्त्तिर्यस्य सो वर्तते)

परेभ्यो जीवितं येषां गोपयन्ति परे हिते।
कीर्त्तिभिः पश्य लोकान्ताँन्गदयन्ति जनाः कृतम्।।

इह गोपालशब्दस्य अर्थ स्फुटो भवति ।

ये प्रयोगाः धातुक्रमेण प्रदर्शिताः तेषां प्रयोगैस्ते भाषायामनिशं वर्तमानाः कृतप्रयोगविषयारासन्तामिति मनसाऽवधाय ईषद्यत्नः कृतः। यतः 'अप्रयोगः प्रयोगान्यत्वात्' इति वचनेन भाषायां ये धातवः कालक्रमेण विलोपिताः भविष्यन्तीति कम्पितहृदा एष स्वरचनाऽमधुरधृष्टयत्नः पुरतः। यत्र क्वापीषदपि रसे रसाभासे भावे भावाभासे चाल्पता सा चपलतामतिः मम। तत्परिष्काराय संसूच्य मामनुगृह्णन्तु कृपया।

तृतीयपुटस्य शेषभागः

# वैदिकज्ञानस्य व्यावहरिकपक्षाणां

2.डॉ. एम. आर. राओ, निदेशकः, ओ. एन. जी. सी. ।
3.प्रो. ए. आर. चौधरी, निदेशकः, सरस्वती-नदी-अनुसन्धानकेन्द्रम्, भूविज्ञानविभागः, कुरुक्षेत्र-विश्वविद्यालयः।
4.प्रो. रमेशभारद्वाजः, अध्यक्षः, संस्कृतविभागः, दक्षिणपरिसरः, दिल्ली-विश्वविद्यालयः।
5.श्रीमती सुव्रता विनोदमहोदया, सदस्या, वेद-विज्ञान-अध्ययनकेन्द्रम्, वाराणसी।

मुख्यातिथिपदमलंकुर्वता प्रो. रामविलासशर्मवर्येण भणितं यत् सरस्वती न केवलमेका पौराणिकी नदी अपि तु अस्माकं संस्कृतेः परम्पराया मुख्याधारशिलेत्येतदर्थमस्माभिः नूनमनुसन्धानं विधातव्यम्। श्रीयुतेन प्रशान्तभारद्वाजेनोक्तं यत् सरस्वति-विषये ऐतिहासिकाध्ययनं सम्पादितम्।

बृहत्तर-वैदिक-अध्ययन-परिषदा सांस्कृतिककार्यक्रमद्वयमुपस्थापितम्। प्रथमेऽहनि 'कथक-यात्राः मन्दिर दरवार एवं मञ्च' इत्याख्ये सांस्कृतिककार्यक्रमे डॉ. सुप्रिया संजू, गुरु-दिनेशपरिहारः, सुश्री रोशनी




6.डॉ. श्रेयांसो द्विवेदी, उपाध्यक्षः, हरियाणा संस्कृत अकादमी, हरियाणा।

प्रो. रामविलासशर्मा, शिक्षामन्त्री, हरियाणा आमन्त्रिताः विशिष्टाः वक्तारः

महत्वपूर्णेऽस्मिन् सत्रे सरस्वति-नद्याः उपरि वैदिकग्रन्थ-उत्खनन-उपग्रहचित्र-वैज्ञानिक-प्रमाणमनुसृत्य प्रामाणिकचर्चा सञ्जाता।

सुश्री साम्भवी च कथकनृत्यकलां प्रदर्शितवत्यः।वैदिकज्ञानपिपासवः समे नृत्यप्रदर्शनमिदं भृशमभिनन्दितवन्तः।सम्मेलनस्य द्वितीयदिवसे डॉ. ऋषिराजः, श्रीयुतो मुनिराजः, श्रीयुतो विकासः श्रीयुतः सत्यार्थप्रोवरश्च 'श्रुतिसन्ध्या' इत्याख्यं सस्वर-वैदिक-पाठं कृतवन्तः।

कथककलाकाराः सत्रसंयोजकश्च सस्वर-वेद-पाठिनः

शेषभागःसप्तमपुटे

# 'मनोगतम्' [39] इतिकार्यक्रमस्य संस्कृत-भाषिकानुवादः (प्रसारण-तिथिः- 31.12.2017)



-संस्कृत-भाषान्तरं
द्वारा- डॉ.बलदेवानन्द सागरः
Cell- 9810 5622 77
Email - baldevanand.sagar@gmail.com

मम प्रियाः देशवासिनः ! नमस्कारः। इदं 'मन की बात'-प्रसारणं हि, अस्य वर्षस्य अन्तिमोह्यस्य कार्यक्रमः, तथा च संयोगं पश्यन्तु यत् अद्य, सप्तदशोत्तर-विंशति-शत-तमस्य वर्षस्य अपि अन्तिमो दिवसोह्यस्ति। सम्पूर्णेह्यपि वर्षेह्यस्मिन् अनेके विषयाः अस्माभिः भवद्भिः च संविभाजिताः। 'मन की बात'-प्रसारणस्य कृते भवद्भिः प्रेषितानां बहूनां पत्राणाम्, अनेकासां टिप्पणीनां, विविधानां चविचाराणाम् आदान-प्रदानम्, मम कृते तु सदा नूतनायाः ऊर्जायाः प्रदायकं सिद्ध्यति।

कासाञ्चन होराणाम् अनन्तरं वर्षमिदं परिवर्तिष्यते, परञ्च अस्मदीयः एषः कथा-क्रमः इतः परमपि एवमेव प्रवर्तिता। आगमिष्यमाणे वर्षे वयं,नवीनाः कथाः करिष्यामः, नूतनान् अनुभवान् च संविभाजयिष्यामः। भवद्भ्यः सर्वेभ्यः अष्टादशोत्तर-विंशति-शत-तम-वर्षस्य कृते भूरिशो मङ्गल-कामनाः। नातिचिरं डिसेम्बर-मासे पञ्चविंशति-तमे दिनाङ्के अशेष-जगति क्रिस्मस्-पर्व सोत्साहम् आमानितम् । भारतेह्यपि जनैः सोत्साहं पर्वेदम् आमानितम् । क्रिस्मस्-पर्वणि वयं ईसा-मसीहस्य बहुमूल्यान् उपदेशान् स्मरामः, तथा च, ईसा-मसीहेन यस्मै विषयाय सर्वाधिकं बलं प्रदत्तम्, सः आसीत् -'सेवा-भावः'। सेवा-भावनायाः सारं वयं बाइबले अपि पश्यामः। 'The Son of Man has come, not to be served,But to serve,And to give his life, as blessing, To all humankind.' अर्थात् मानव-पुत्रः समायातः, सेवा-प्राप्तये नैव, अपि तु सेवा-कार्यार्थम्।, आशीर्भूतं स्वीयं जीवनं मानवतायै अर्पयितुम्'

इदं द्योतयति यत् किं नाम सेवायाःमाहात्म्यम् ? भवतु नाम विश्वस्य काचिदपिजातिः, कश्चन अपि धर्मः, परम्परा, वर्णः वा, परञ्च सेवाभावो हि मानवीय-मूल्यानाम् अनुपम-अभिज्ञानत्वेन प्रवर्तते । अस्मदीयेदेशे 'निष्काम-कर्म'-विषये सुबहु श्रूयते अर्थात् तादृशी सेवा या हि काञ्चिदपि अपेक्षां विना क्रियते। अस्माकं ग्रन्थेषु तु प्रोक्तमेवञ्च 'सेवा परमो धर्मः'। 'जीव-सेवा एव शिव-सेवा' तथा च,गुरुदेवःरामकृष्ण-परम-हंसः तु कथयति - शिव-भावेन जीव-सेवां कुर्यात् अर्थात् विश्वस्मिन् विश्वे एतानि सर्वाणि मानवीय-मूल्यानि तुल्यानि एव सन्ति। आगच्छन्तु, वयं सर्वे एतान्महापुरुषान्, पवित्र-दिवसान् च स्मरन्तः, अस्मदीयायै अस्यै महत्यै मूल्य-परम्परायै नूतनां चेतनां, नवीनाञ्च ऊर्जाम् आनयेम तथा च, स्वयमपि एनां जीवितुं प्रयतेम।

मम प्रियाःदेशवासिनः ! एतद् वर्षं गुरुगोविन्द-सिंहस्य सार्ध-त्रिशती-रूपेण प्रकाश-पर्व-वर्षमपि आसीत्। गुरुगोविन्द-सिंहस्य साहस-त्याग-सम्भरितम्असाधारणं जीवनम् अस्माकं कृते प्रेरणा-स्रोतस्त्वेन वर्तते। गुरुगोविन्द-सिंहः महान्ति जीवन-मूल्यानि उपादिशत् तथा च, तानि आधृत्यस्वीयं जीवनं यापितवान्। अन्यतमः गुरुः, कविः, दार्शनिकः, महान् योद्धा च गुरुगोविन्द-सिंहः एतासु सर्वास्वपिभूमिकासु जनान् प्रबलतया प्रेरितवान् । असौउत्पीडनम् अन्यायञ्च विरुद्ध्य संघर्षमकरोत्। जाति-धर्मयोः बन्धनानि परिहर्तुं सः जनान् शिक्षितवान् । एवंक्रियमाणः असौ व्यक्तिगतरूपेण बहुशः हानिमपि सम्मुखीकृतवान् । परञ्च सः न कदापि द्वेष-भावनान्वितः सञ्जातः । जीवनस्य प्रत्येकमपि क्षणे सःप्रेम्णः त्यागस्य शान्तेश्चसन्देशं प्रादात् । कियतीभिः महतीभिःविशेषताभिः सम्भरितमासीत् तस्य व्यक्तित्वम् !ममेदं सौभाग्यं यत् एतद्-वर्षस्य आरम्भे गुरुगोविन्द-सिंहस्य सार्ध-त्रि-शती-जयन्त्याः अवसरेपटनासाहिब-स्थले आयोजितेप्रकाशोत्सवे सहभागित्वम् आवहम् । आगच्छन्तु, वयं सर्वेह्यपि संकल्पयेम तथा च, गुरुगोविन्द-सिंहस्य महद्भ्यः उपदेशेभ्यः प्रेरणादायि-जीवनात् च शिक्षाम् आदाय निज-जीवने तदाचरितंद प्रयतेम।

अष्टादशोत्तर-विंशति-शत-तम-वर्षे जान्युआरि-मासे प्रथम-दिनम्अर्थात् श्वः, मम मन्तव्यानुसारेण श्वस्तनः विशिष्ट-दिवसः अस्ति स्यात् भवन्तः अपि आश्चर्यम् अनुभविष्यन्ति यत्प्रतं वर्षम् आयाति, जान्युआरि-मासीयः प्रथम-दिनमपि प्रतिवर्षम् आगच्छति परं यदाहं विशिष्ट-दिनमिदम् इति कथयामि, ततु नूनं विशिष्टमेव ! ये जनाः [ 2000 ] द्विसहस्र-तमे वर्षे जनिं लब्धवन्तः आहोस्वित् ततः परं जाताः अर्थात् एकविंशति-तमे शताब्दे समुत्पन्नाः ते अष्टादशोत्तर-विंशति-शत-तम-वर्षे जान्युआरि-मासे प्रथम-दिनात् मतदातृ-रूपेण अर्हाः भवितारः। भारतीय-लोकतन्त्रं,एकविंशति-तम-शताब्दस्य मतदातॄणां, नूतन-भारतं भवतां मतदातॄणां स्वागतं करोति। अहम्, एतान् अस्मदीयान् युव-जनान् वर्धापयामि, सर्वान् च साग्रहं व्याहरामि यत् भवन्तः आत्मानं मतदातृ-रूपेण पञ्जीकारयन्तु । अशेष-भारतं भवतः एकविंशति-तम-शताब्दस्य मतदातृ-रूपेण वर्धापयितुं लालायते। एकविंशति-तम-शताब्दस्य मतदातृ-रूपेण भवन्तः अपि गौरवमनुभवेयुः। भवतां मतदानं नूतन-भारतस्य आधारः सेत्स्यति। मतदानस्य शक्तिः, कस्मिन्नपि लोकतन्त्रे महत्तमा शक्तिः भवति। लक्षशो जनानां जीवने सकारात्मकं परिवर्तनम् आपादयितुं मतदानं हि सर्वोत्तमं प्रभावि साधनं वर्तते। न केवलं भवन्तो मतदानार्थम् अर्हाः भवन्ति अपि तु, एकविंशति-तम-शताब्दस्य भारतं कीदृशं स्यात् ? एकविंशति-तम-शताब्दस्य भवतां स्वप्नानि कानि स्युः ? भवन्तोह्यपि एकविंशति-तम-शताब्दस्य भारतस्य निर्मातारः भवितुम् अर्हन्ति तथा च, अस्य आरम्भः जान्युआरिमासस्य प्रथम-दिनाङ्कात् विशेषरूपेण सञ्जायते। तथा चाद्य स्वीयेह्यस्मिन् 'मन की बात'-प्रसारणे अहम् अष्टादशतः पञ्चविंशति-वर्षीयैः ऊर्जा-संकल्प-सम्भरितैः यशस्विभिः युवभिः सम्भाषितुमीहे। अहमेतान् 'New India Youth'-इति नूतन-भारतस्य तारुण्यम् आमिनोमि। नूतन-भारतस्य तारुण्यम् इत्यस्य अर्थो भवति- उमङ्गः, उत्साहः, ऊर्जा च। दृढमहं विश्वसिमि यत् अस्मदीयानाम् एतेषां ऊर्जावतां यूनां कौशलेन शक्त्या चैव अस्माकं नूतन-भारतस्य स्वप्नं पूर्णं भविता। यदा वयं नूतन-भारत-विषये वदामः, तदा तु, इदं हि तत् भारतं यद्धि जातिवाद-सम्प्रदायवाद-आतङ्कवाद-भ्रष्टाचाराणां गरलात् मुक्तं स्यात्। अस्वच्छतातः निर्धनतातः च मुक्तं स्यात्। 'New India'- इति नूतनं भारतं यत्र सर्वेभ्योह्यपि तुल्यावसराः भवेयुः, यत्र च सर्वेषामपि आशाः आकाङ्क्षाः च पूर्णाः स्युः । अभिनवं भारतं यत्र शान्तिः, एकता, सद्भावना चैव अस्मदीया सञ्चालन-शक्तिः भवेत् । ममेदं नवीन-भारतस्य तारुण्यम् अग्रे आगच्छेत् मन्थनं च कुर्यात् यत् केन विधिना भविष्यति नवीनं भारतम् ? सः स्वयमपि आत्मनः कृते मार्गं निश्चिनुयात्, यैः साकं सः सम्पृक्तोह्यस्ति, तान् अपि संयोजयेत्, एवं हि पथिक-सार्थः संवर्धेत। भवन्तोह्यपि अग्रेसरन्तु, देशोह्यपि अग्रेसरेत् । सद्यः यदाहं भवद्भिः सम्भाषे तदा मम मनसि विचारः स्फुरितः यत् किं वयं भारतस्य प्रत्येकमपि जनपदे mock parliament- इति विडम्बितां संसदमायोजयितुं शक्नुमः ? यत्र अष्टादशतः पञ्चविंशति-वर्षीयाः युवानः, सम्भूय नूतन-भारत-विषयकं मन्थनं कुर्युः, मार्गान् मृगयेयुः, योजनाः विरचयेयुः ? केन प्रकारेणच वयं अस्मदीयानि स्वप्नानि एतत्-शताब्दस्य द्वा-विंशति-तम-वर्षात् पूर्वमेव साधयिष्यामः ?केन प्रकारेण च वयं तादृशं भारतं विरचयिष्यामः यस्य स्वप्नम् अस्मदीयाः स्वतन्त्रता-सैनिकाः अवालोकयन् ? महात्म-गाँधी स्वतन्त्रतायाः आन्दोलनं जनान्दोलनं व्यदधात्।

मम तरुणाः सखायः !साम्प्रतं कालस्य इयम् अपेक्षा यद्वयं अपि एकविंशति-तम-शताब्दस्य भव्य-दिव्य-भारतस्य कृते जनान्दोलनमेकं प्रवर्तयेम । विकासस्य जनान्दोलनम् ! प्रगतेः जनान्दोलनम् !! सामर्थ्यवतः शक्तिशालिनश्च भारतस्य जनान्दोलनम् !!! अहमभिलषामि यत् ओगष्ट-मासे प्रायेण पञ्चदशे दिनाङ्के दिल्ल्याम् एकां विडम्बितां परिभावितां च संसदम् आयोजयेम यत्र प्रत्येकमपि जनपदात् चितः एकः युवा, विषयमेनं परिचर्चेत यत् आगामिनि वर्ष-पञ्चके नूतन-भारतस्य निर्माणं केन प्रकारेण कर्तुं शक्यते संकल्पतः सिद्धिः कथं प्राप्तुं शक्यते ? सम्प्रति यूनां कृते बहवः अवसराः सञ्जाताः। Skill Development- इति कौशल-विकासतः Innovation-entrepreneurship- इति नवाचार-उद्यमिता-क्षेत्रे अस्मदीयाः युवानः अग्रगामिनो भवन्ति सफलाश्च वर्तन्ते। अभिलषामि यत् एतेषां सर्वेषामपि अवसराणां योजनानां सूचना नवीन-भारतस्य तरुणाः एकत्र एव कथं प्राप्नुयुः ? तथा च, विषयेह्यस्मिन् तादृशी काचित् व्यवस्था भवेत् येन प्राप्ते सति अष्टादश-वर्षीयायुषि सः एतत्-जगतः, एतेषां विषयाणां कृते च सहजतया सूचितो भवेत्, स च आवश्यकान् लाभान् अपि अवाप्नुयात्।

मम प्रियाः देशवासिनः ! विगते 'मन की बात'-प्रसारणे अहं भवतां समक्षं positivity- इति उत्साह-निश्चययोः महत्व-विषये किञ्चित् व्याख्यातवान् 7 साम्प्रतं संस्कृत-वाङ्मयस्य श्लोकमेकं स्मरामि-

उत्साहो बलवान् आर्य ! नास्त्युत्साहात् परं बलम्।
सोत्साहस्य च लोकेषु न किञ्चिदपि दुर्लभम् ॥

अर्थात् उत्साह-समन्वितः जनः अतितरां बलशाली भवति, यतो हि उत्साहात् परं न किमपि उत्तमं विद्यते उत्साह-समन्वितस्य रचनात्मकता-युतस्य च जनस्य कृते न किञ्चिदपि अशक्यमस्ति, आङ्गल-भाषायाम् अपि जनाः निगदन्ति - 'Pessimism leads to weakness, optimism to power' A निराशावादः दुर्बलताम् अनुभावयति, आशावादश्च शक्तिं प्रददाति, विगते 'मन की बात'-प्रसारणे देशवासिनो मया प्रार्थिताः आसन् यत् ते वर्षेह्यस्मिन् अधिगतान् रचनात्मकान् क्षणान् संविभाजयेयुः तथा च, आगामि-वर्षस्य स्वागतं रचनात्मके आशापूर्णे च परिवेशे कुर्युः, नूनं प्रसीदामितरां यत् जनानाम् अधिसंख्यं सामाजिक-सञ्चार-माध्यमेषु, MyGov-NarendraModi App - चेत्यत्र सोत्साहं उत्तरितवत्य७, स्वीयान् अनुभवान् च संविभाजितवत् A Positive India hashtag (#)- इत्यनेन सह लक्षशो tweet-सन्देशाः विहिताः ये हि प्रायेण सार्धेक-कोट्यधिक-जनैः अवगताः। एकतः उत्साहस्य अयं सञ्चारः भारताद् आरभत, स च, कृत्स्नेह्यपि जगति प्रसृतो जातः । ये हि tweet-सन्देशाः अपराणि चोत्तराणि अधिगतानि तानि सुतरां प्रेरणादायीनि वर्तन्ते । अयं हि सुखदोह्यनुभवः आसीत् ।7 केचन देशवासिनः वर्षेह्यस्मिन् तान् घटनाक्रमान् संविभाजितवन्तः ये हि तेषां मनान्सि विशेषेण सकारात्मक-रूपेण प्रभावितवन्तः, केचन तु स्वीयानां व्यक्तिगतोपलब्धीनां संविभाजनं कृतवन्तः।

ध्वनि-सन्दर्भाः (साउंड बाईट) #

# मम नाम मीनू भाटिया अस्ति। अहं मयूर-विहार-पॉकेट-वन-फेज-वन- दिल्ल्यां निवसामि । मम पुत्री एम.बी.ए.-इति अध्ययनं वाञ्छति स्म, एतदर्थं मह्यं बैङ्कात् ऋणम् अपेक्ष्यते स्म तद्धि अहं अतितरां सरलतया प्राप्तवती तथा च, मम पुत्र्याः अध्ययनं निर्विघ्नं प्राचलत् ।

# मम नाम ज्योति-राजेंद्र-वाडे अस्ति । अहं बोडल-तः वदामि । मम पतिः प्रतिमासं रूप्यक-प्रदेयं आगोपं कृतवान् । दुर्घनायां सः मृतः। तस्मिन् समये अस्मदीया अवस्था कीदृशी जाता - तत्तु वयमेव जानीमः !सर्वकारस्य अमुना साहाय्येन वयं प्रभूतं लाभान्विताः जाताः, अहञ्च आश्वस्ता संवृत्ता।

# मम नाम संतोष-जाधवः अस्ति। ऐषमः वर्षे, अस्मदीयात् भिन्नर-ग्रामतः National Highway- इति राजमार्गः प्रावर्तत। एतस्मात् कारणात् अस्मदीयः मार्गः समीचीनः समभवत् तथा च, व्यापार-कार्याणि अपि वर्धमानानि सन्ति।

# मम नाम दीपांशु-आहूजा, मोहल्ला-सादतगंज, जिला-सहारनपुरम्, उत्तर-प्रदेश-निवासी अस्मि। भारतीय-सैनिकानां घटना-द्वयं वर्तते- एतयोः अन्यतरा तु - पाकिस्तानोपरि विहितं surgical strike-इति शस्त्र-निपातनात्मकम् आक्रमणं येन आतङ्कवादस्य आरम्भिक-सोपानानि समूलं प्रणाशितानि, युगपदेव अस्मदीयानां भारतीय-सैनिकानां पराक्रमं डोकलाम्-इत्यत्र दृष्टवन्तः सः तु अतुलनीयः एवास्ति।

# मम नाम सतीश-बेवानी अस्ति 7 अस्मदीयायां वसतौ पेय-जलस्य समस्या आसीत् । प्रायेण विगतेभ्यः चत्वारिंशत्-वर्षेभ्यः वयं सेनायाः जल-प्रणालिकासु निर्भराः आस्म। अधुना एषा पृथक्तया प्रणालिका व्यवस्थापिता अस्ति, नूनम् इयम् अस्य वर्षस्य अस्मदीया महती उपलब्धिः वर्तते।

एतादृशाः अनेके जनाः सन्ति ये नैजेषु स्तरेषु तादृन्शि कार्याणि कुर्वन्ति यानि अनेकेषां जीवनेषु सकारात्मकं परिवर्तनं विदधति। वस्तुतस्तु एतदेवास्ति - नूतनं भारतम् - यस्य निर्माणं वयं सर्वे सम्भूय कुर्मः। आगच्छन्तु, आभिः लघु-लघु-प्रसन्नताभिः सहैव वयं नव-वर्षे प्रविशेम, नव-वर्षस्य शुभारम्भं करवाम, तथा च, 'positive India'-इति रचनात्मक-भारततः 'progressive India'- इति प्रगतिशील-भारतस्य दिशि दृढतरं पद-क्षेपं विदधेम । अस्मिन् सन्दर्भे अहमपि कश्मीरस्य प्राशासनिक-सेवा-स्पर्धायाः प्रथम-स्थान-भाजिनः अंजुम-बशीर-खान-खट्टकस्य (Anjum Bashir Khan Khattak) प्रेरणादायि-वृत्तम् उदाहर्तुम् अभिलषामि । सः विद्वेष-आतङ्कवादयोः दंशात् बहिः निष्क्रम्य Kashmir Administrative Service-परीक्षामुत्तीर्य प्रथमं स्थानम् अध्यगच्छत् । भवन्तः उदन्तमिमं श्रुत्वा आश्चर्यम् अनुभविष्यन्ति यत् विगते शताब्दे नवतितमे वर्षे आतङ्कवादिनः तस्य पैतृकं गृहं प्रदाहितवन्तः । तत्र हिंसातङ्कवादयोः तादृशः परिवेशः आसीत् येन विवशीभूतं तस्य कुटुम्बं स्वीय-पैतृक-भूमिं अत्यजत् । लघुः बालकः यं परितः यः हिंसा-परिवेशः आसीत्, हृदि अन्धकारात्मकं कटुतरं च भावं जनयितुम् अलमासीत् - परञ्च अंजुमः एवम् नैवाकरोत् । सः न कदापि आशां पर्यत्यजत् । सः आत्मनः कृते पृथगेकं पन्थानम् अवाचिनोत् - जनानां सेवा-मार्गम् । साम्प्रतमसौ न केवलं जम्मू-कश्मीरस्यैव, अपि तु अशेष-देशस्य यूनां कृते प्रेरणा-प्रदः सिद्ध्यति । अंजुमेन इदं प्रमाणितं यत् कस्याञ्चन अपि प्रतिकूलायां स्थितौ सकारात्मकैः कार्यैः निराशायाः अभ्रम्लिहाः अपि ध्वंसयितुं शक्यन्ते ।

नातिचिरं विगते एव सप्ताहे अहं जम्मू-कश्मीरस्य काश्चन पुत्रीः मेलितुम् अवसरं लब्धवान् । तासु अप्रतिमः भावः, अतुलनीयः उत्साहः, उत्कृष्टानि च स्वप्नानि आसन्, मया श्रुतं यत्ताः जीवनस्य केषु केषु क्षेत्रेषु प्रगतिमनुष्ठातुं समीहन्ते । ताश्च कियतीं प्रबलाम् आशां सन्धारयन्ति ! ताभिः साकं संवादावसरे मया अनुभूतं यत्तासु निराशा-लेशोह्यपि नैवास्ति - उत्साहः, उमङ्गः, ऊर्जा, स्वप्नानि, संकल्पाः चैवासन् । अहमपि प्रेरितोह्यभवम् ।

एषा एवास्ति - देशस्य शक्तिः, एते एव सन्ति मदीयाः युवानः, एतत् एव विद्यते मदीय-देशस्य भविष्यत्।

मम प्रियाः देशवासिनः ! न केवलं अस्मदीयस्य देशस्य अपितु, विश्वस्य प्रसिद्ध-धार्मिक-स्थलानि यदा यदा चर्च्यन्ते तदा केरलस्य सबरीमाला-मन्दिरस्य चर्चा स्वाभाविकतया भवत्येव । विश्व-प्रसिद्धेऽस्मिन् मन्दिरे, भगवतः अय्यप्पा-स्वामिनः आशीर्वादम् आदातुं प्रतिवर्षं श्रद्धालवः कोटिशो जनाः आयान्ति । यत्र एतावन्तो बृहन्मात्रिकाः श्रद्धालवः आयान्ति तत्र स्वच्छता-सन्धारणं हि कियत् दुष्करं समाह्वान-रूपम्? विशेषेण तस्मिन् स्थले यद्धि पर्वतानां काननानाञ्च मध्ये विराजते। परञ्च एनां समस्यां संस्कारत्वेन केन प्रकारेण परिवर्तयितुं शक्यते, जन-सहभागित्वस्य च कियती शक्तिः वर्तते चेति प्रमाणयितुं सबरीमाला-मन्दिरं हि उदाहरण-रूपं वर्तते । पी.विजयन्-नाम रक्षि-अधिकारी 'पुण्यम् पुन्कवाणम्' (PunyamPoonkavanam) इत्यभिधेयं कार्यक्रमम् आरभत यस्यान्तर्गतं स्वच्छतायाः जागरुकतायै स्वैच्छिकम् अभियानं सः प्रवर्तितवान् । तेन एतादृशी परम्परा प्रवर्तिता यत् यः कश्चन अपि यात्री आगच्छति, तस्य यात्रा तावदेव पूर्णा नैव भविष्यति यावत् सः स्वच्छता-कार्यक्रमे कञ्चन अपि शारीरिक-श्रमं नैव विधास्यति । अभियानेऽस्मिन् न कश्चन ज्येष्ठः वा श्रेष्ठः वा न कश्चन कनिष्ठो वा लघुः भवति । प्रत्येकमपि यात्री, भगवतः पूजायाः अंशत्वेन किञ्चित्-कालार्थं स्वच्छता-कार्याणि करोति, मलिनतायाः अपसारणं च विदधाति । प्रति-प्रभातं अत्र स्वच्छतायाः दृश्यम् अतितराम् अद्भुतं भवति, सर्वेऽपि तीर्थयात्रिणः सम्भूय अत्र संलग्नाः भवन्ति । भवतु नाम कश्चन विशिष्टो जनो वा समृद्धो वा विशेषाधिकारी, प्रत्येकमपि सामान्य-यात्रि-रूपेण 'पुण्यम् पुन्कवाणम्' (PunyamPoonkavanam)- इति कार्यक्रमस्य अङ्गत्वेन स्वच्छतां विधाय एव अग्रे यान्ति। अस्माकं देशवासिनां कृते एतादृन्शि अनेकानि उदाहरणानि सन्ति । सबरीमाला-क्षेत्रे एतावत्-सम्वर्धितम् एतत् स्वच्छता-अभियानम्, तत्रापि च 'पुण्यम् पुन्कवाणम्' (PunyamPoonkavanam), इदं हि प्रत्येकमपि यात्रिणः यात्रायाः अङ्गमेव भवति। तत्र कठोर-व्रतेन साकं स्वच्छतायाः कठोर-संकल्पः अपि युगपदेव प्रचलति।

मम प्रियाः देशवासिनः ! एतद्-शताब्दस्य चतुर्दशे वर्षे ओक्टोबर-मासे द्वितीये दिने पूज्य-बापू-वर्यस्य जन्म-जयन्त्याः अवसरे वयं सर्वे संकल्पितवन्तः यत् पूज्य-बापू-वर्यस्यअपूर्णं कार्यं यद्धि 'स्वच्छ-भारतम्', 'मलिनता-मुक्तं भारतम्' चेति वर्तते, तस्य सार्ध-शती भवेत् तदा अस्यां दिशि नूनं किञ्चिद् किञ्चिदपि करवाम। स्वच्छतादिशि सम्पूर्णेऽपि भारते व्यापक-स्तरीयः प्रयासो भवति । ग्रामीणेषु महानगरीयेषु च क्षेत्रेषु व्यापकेण जन-सहभागितयापि परिवर्तनं दृग्गोचरीभवति। पौर-क्षेत्रेषु स्वच्छता-स्तरस्य उपलब्धीनाम् आकलनार्थम् आगामिनि जान्युआरिमासे चतुर्थ-दिनाङ्कतः मार्च-मासीयं दशम-दिनं यावत् जगतः सर्वोच्चं सर्वेक्षणं-'स्वच्छ-सर्वेक्षणम् - अष्टादशोत्तर-एकविंशति-तम-वर्षम्-[2018]'-इति विधास्यते । सर्वेक्षणमिदं, चतुःसहस्राधिकेषु नगरेषु प्रायेण चत्वारिंशत्-कोट्यधिक-जनानां वसतिषु विधास्यते । अस्य सर्वेक्षणस्य अवधौ, नाना वृन्दानि विभिन्नानि नगराणि निरीक्षिष्यन्ते । नागरिकैः सम्भाष्य तेषां प्रतिभावान् एकत्रीकरिष्यन्ति । स्वच्छता-App- इति उपादानस्य उपयोगेण तथा च, विभिन्न-प्रकारकेषु सेवा-स्थलेषु सञ्जातान् परिष्कारान् विश्लेषयिष्यन्ति । स्वच्छता, न केवलं प्रशासनस्य दायित्वम् । प्रत्येकमपि नागरिकः नागरिक-संघटनानि चापि एतदर्थं नितरां समुत्तरदायीनि सन्ति। सर्वान् नागरिकान् प्रार्थये यत्ते सम्पत्स्यमानेऽस्मिन् स्वच्छता-सर्वेक्षणे सोत्साहं सहभागित्वं निर्वाहयेयुः । दृढं विश्वसिमि यत् गृहस्य शुष्कम् आर्द्रञ्च अवकरं पृथक्-कृत्वा नील-वार्णिकेषु हरित-वार्णिकेषु च कण्डोलेषु निक्षेप्स्यन्ति । अवकरस्य मलिन-वस्तूना @ reduce, re-use, re-cycle- इति अपचय-पुनःप्रयोग-पुनःसर्जनात्मकः सिद्धान्तः अतितरां प्रभावी भवति । यदा जान्युआरिमासेचतुर्थ-दिनाङ्कतः मार्च-मासीयं दशम-दिनं यावत् जगतः सर्वोच्चं सर्वेक्षणं- 'स्वच्छ-सर्वेक्षणं भविता तदा स्वच्छतायाः अस्यां स्वस्थ-स्पर्धायां कदाचित् भवान् पश्चवर्ती मा स्यादिति - प्रत्येकमपि नगरे सार्वजनिक-चर्चायाः विषयो भवेत् । भवतां सर्वेषां इदं स्वप्नं स्यात्, 'अस्मदीयं नगरम् - अस्मदीयः प्रयासः', 'अस्मदीया प्रगतिः -देशस्य प्रगतिः' । आगच्छन्तु, अमुना संकल्पेन साकं वयं सर्वे पुनरेकवारं पूज्य-बापू-चरणं स्मरन्तः स्वच्छ-भारतस्य संकल्पं स्वीकुर्वन्तः पुरुषार्थस्य पराकाष्ठाम् अनुतिष्ठेम ।

मम प्रियाः देशवासिनः ! केचन विषयाः प्रथम-दृष्ट्या लघवः प्रतीयन्ते परञ्च समाज-दृशा अस्मदीयम् अभिज्ञानं सुदीर्घकालं यावत् सततं प्रभावयन्ति । अद्यतनस्य 'मन की बात'-प्रसारणस्य माध्यमेन अहं भवद्भिः साकं तादृशमेकं विषयं संविभक्तुं वाञ्छामि । अहं सूचितोऽस्मि यत् काचित् मुस्लिम-महिला, हज-यात्रार्थं गन्तुकामा अस्ति चेत् सा 'महरम'-इति वा स्वीय-पुरुष-अभिभावकं विना गन्तुं नैव शक्नोति । मया चिन्तितं यत् केन अयं नियमः विरचितः? कथम् एतादृशो भेद-व्यवहारः? मया गभीरतया चिन्तितं तदा आश्चर्यम् अनुभूतम् - स्वतन्त्रतायाः प्राप्तेः सप्ततेः वर्षाणाम् अनन्तरमपि एतादृक्-नियमनस्य प्रवर्तकाः अपि वयमेव7 विगतेभ्यः दशकेभ्यः मुस्लिम-महिलाभिः साकम् अन्याय-व्यवहारः प्रवर्तते स्म, परञ्च न केनापि विषयोऽयं चर्च्यते स्म 7 न केवलम् एतावदेव, केषुचित् इस्लामिक-देशेष्वपि एतादृशो नियमः नास्ति। परञ्च भारते मुस्लिम-महिलानां कृते अयमधिकारः सुलभः नासीत्। प्रसन्नताम् अनुभवामि यत् अस्मदीयेन सर्वकारेण एतद् अवहितम्। अस्माकम् अल्पसंख्यक-कार्य-मन्त्रालयेन आवश्यकोपायाः विहिताः तथा च, सप्तति-वर्ष-प्राचीनां परम्पराम् उत्सार्य एतादृक्-नियमनम् अपाकृतम् । साम्प्रतं मुस्लिम-महिलाः, 'महरम'-इत्येनं विना हज-यात्रार्थं गन्तुं शक्नोति, अहं नितरां प्रसीदामि यत् ऐषमः क्रमेदेशस्य प्रायेण विभिन्न-भागेभ्यः त्रयोदश-शत-मिताः मुस्लिम-महिलाः'महरम'-इत्येनं विना हज-यात्रार्थम् आवेदितवत्यः। अल्पसंख्यक-कार्य-मन्त्रालयमहं परामर्शितवान् यत् तादृशी सर्वाः अपि महिलाः हज-यात्रायै अनुमताः स्युः। पूर्ण-विश्वासेन वदामि यत् भारतस्य विकास-यात्रा, अस्माकं नारी-शक्तेः बलाधृतास्ति, तासां प्रतिभाधारेण समुन्नता तथा च, सततम् अग्रेसरिष्यति। अस्मदीयोऽयम् अनारतः प्रयासः स्यात् यत् अस्माकं महिलाः अपि पुरुष-तुल्यान् अधिकारान् अवाप्नुयुः, समानावसरान् च लभेरन्, येन ताः अपि प्रगति-पथि युगपदेव सम्भूय अग्रेसर्तुं पारयेयुः।

मम प्रियाः देशवासिनः ! जान्युआरि-मासीयं षड्-विंशतमं दिनम् अस्माकं कृते ऐतिहासिक-पर्व वर्तते । परम् ऐषमः दिनमिदं विशेषतया स्मरिष्यते । एतद्-वर्षीये गणतंत्र-दिवस-समारोहे सर्वेषामपि दश-संख्याकानाम् आसियान-(ASEAN)-देशानां नेतारः मुख्य-अतिथि-रूपेण भारतमागमिष्यन्ति । गणतंत्र-दिवसावसरे अस्मिन् क्रमे एकः एव नैव 'दश' (10) मुख्याः अतिथयो भवितारः । भारतस्य इतिहासे पूर्वं न कदाचिद् एवं जातम् । एतद्-वर्षं सप्तदशोत्तर-द्विसहस्रतमम् [2017], आसियान-(ASEAN) देशानां भारतस्य च कृते विशिष्टमेव अवर्तत। आसियान-संघटनेन (ASEAN)- सप्तदशोत्तर-द्विसहस्रतमे वर्षे स्वीयानि पञ्चाशत्-वर्षाणि पूर्णतां नीतानि, अपि च, सप्तदशोत्तर-द्विसहस्रतमे एव वर्षे आसियान-संघटनेन(ASEAN) साकं भारतस्य सहभागितायाः पञ्च-विंशति-मितानि वर्षाणि पूर्णतां नीतानि । जान्युआरि-मासीये षड्-विंशे दिनाङ्के विश्वस्य दश-देशानां महान्तः नेतारः सम्भूय समुपस्थास्यन्ते इति तु सर्वेषामपि भारतीयानां कृते गौरवास्पदमेव ।

मम प्रियाः देशवासिनः ! अयं हि उत्सवानाम् ऋतुः। वस्तुतस्तु अस्मदीयोऽयं देशः पर्वणाम् उत्सवानाञ्च देशोऽस्ति। स्यादेव कश्चन दिवसोऽस्ति यस्मिन् पर्व वा उत्सवो वा नास्ति । नातिचिरम् अस्माभिः क्रिस्मस-उत्सवः आमानितः, इतः परं नूतन-वर्षमागम्यमानमस्ति। आगामि-नूतन-वर्षं भवतां सर्वेषां कृते अनेक-विध-प्रसन्नता-प्रदायकं सुख-समृद्धि-वर्धकञ्च स्यादिति। वयं सर्वेऽपि नवीनेन उत्साहेन, नूतनेन उमङ्गेन, अभिनवेन संकल्पेन, नूत्नया च ऊर्जया च साकम् अग्रेसरेम, राष्ट्रमपि अग्रेसारयेम । जान्युआरि-मासः आदिदेवस्य आदित्यस्य सूर्यस्य उत्तरायण-गमनस्य कालोऽस्ति, तथा च अस्मिन्नेव मासे मकर-संक्रान्तिः आमान्यते। एतद्धि प्रकृत्याः सम्पृक्तं पर्व वर्तते । यद्यपि अस्मदीयं प्रत्येकमपि पर्व कथं कथञ्चन रूपेण प्रकृत्या सम्पृक्तं वर्तते परञ्च विविधता-पूर्णायाम् अस्मदीयायां संस्कृतौ,प्रकृतेः अद्भुत-घटनायाः पृथक्-पृथक्-रूपेण आयोजनस्य प्रथापि वर्तते । पंजाबे उत्तर-भारते च लोहड़ी-पर्व सानन्दम् आयोज्यते, अपरतः उत्तर-प्रदेशेऽपि, अपरत्र च, बिहारे खिचड़ी-तिल-संक्रांति-पर्व सोत्साहं प्रतीक्ष्यते । राजस्थाने संक्रांत-इति, असम-राज्ये च माघ-बिहू-इति, आहोस्वित् तमिलनाडु-राज्ये पोंगल-इति - एतानि सर्वाणि अपि पर्वाणि निज-वैशिष्ट्य-युतानि सन्ति, एतेषां सर्वेषामपि नैजं नैजं महत्वमस्ति। एतानि सर्वाण्यपि पर्वाणि प्रायेण जान्युआरि-मासस्य त्रयोदशतः सप्तदश-दिनाङ्कस्य मध्ये आयोज्यन्ते । एतेषां सर्वेषाम् उत्सवानां नामानि पृथक्-पृथक् वर्तन्ते परञ्च एतेषां मूल-तत्वन्तु एकमेवास्ति - प्रकृत्या कृष्या च सार्धं सम्पृक्तिः।

सर्वेषामपि देशवासिनां कृते एतेषां शुभ-पर्वणाम् अवसरे भूरि भूरि शुभकामनाः वितरामि। पुनरेकवारं अष्टादशोत्तर-विंशति-तमेति नूतन-वर्षावसरे हार्दिक्यः मङ्गल-कामनाः। भूरिशो धन्यवादाः ! प्रियाः देशवासिनः! इतः परम् अष्टादशोत्तर-विंशति-तमे वर्षे पुनः सम्भाषणं करिष्यामः। धन्यवादः !

**पंचमपुटस्य शेषभागः**

## वैदिकज्ञानस्य व्यावहरिकपक्षाणां

सम्मेलन-समापनसमारोहे अध्यक्षपदं निर्व्यूढवान् प्रसिद्धो गणितज्ञः 'वेव्स-अमेरिका' इत्यस्य संस्थापकाध्यक्षश्च प्रो. भूदेवशर्मवर्यः। कार्यक्रम-सहसंयोजिका प्रो. शशिबालामहोदया सर्वेषामतिथीनां परिचयपूर्वकं स्वागतं कृतवती। शुभावसरेऽस्मिन् वेव्स-कुलगीतं लोकायार्पितम्। डॉ. रीनासहायमहोदया तथा तस्याः छात्राः गीतमिमं गीतवन्तः यत्सर्वैः प्रशंसितम्।



मुख्यातिथिपदमलंकुर्वता श्रीलालबहादुरशास्त्रि-राष्ट्रिय-संस्कृत-विद्यापीठस्य कुलपतिना प्रो. रमेशकुमारपाण्डेयमहोदयेनोक्तं यत् वास्तव्येन धर्मः 'कर्तव्यम्' इति। उत्तमा शिक्षा सैव भवति या महतः गुणान् शिक्षयत्येव। वेदाः ज्ञानस्य व्यावहारिकोपयोगाय सदैव प्रेरयन्ति। अखिल-भारतीय-संस्कृत-साहित्य-सम्मेलनस्य महासचिवः समापनसमारोहस्य विशिष्टातिथिः श्रीयुतः रमाकान्तगोस्वामिवर्यः प्रावोचत् यत् वैदिक-संस्कृत-ज्ञानं शाश्वत-सिद्धान्तं प्रस्तौति। ज्योतिर्विद् कदाचित् मृषादूतो भवितुमर्हति न तु ज्योतिषशास्त्रम्। विशिष्टातिथयोऽवर्तन्त - प्रो. विक्टोरिया डिमेनोवा, कला-संकायाध्यक्षा, उरल-फेडरल-विश्वविद्यालयः, रूसः डॉ. पी. वी. जोशी, पूर्व-राजदूतः, मेडागास्कर एवं गुयाना तथा च प्रो. शारदा शर्मा, अध्यक्षा, संस्कृतविभागः, दिल्ली-विश्वविद्यालयः। समापन-वक्तव्येनाप्लावितं साञ्ची-विश्वविद्यालयस्य संस्थापक-कुलपतिवर्यया प्रो. शशिप्रभाकुमारमहोदयया। वैदिकविचाराः सार्वभौम-महत्वाय प्रसिद्धा एव। सम्पूर्णजगतः कल्याणाय 'मनुर्भव' इति सन्देशोऽयं सदैव प्रामुख्यं भजते। समापनसत्रमेनत् वेव्स-सचिवमहोदयया डॉ. अपर्णाधीरद्वारा सोल्लासं सञ्चालितम्।

वेव्स-पुस्तक-विमोचनम्

वेव्स-सम्मेलन-विद्वन्मण्डली

'वेव्स-भारत' इत्यनया संस्थया Science and Spirituality in Vedic Traditions (Vol. VI) तथा वैदिक परम्परा में विज्ञान और अध्यात्म (द्वितीयो भागः) इत्याख्यं नवं प्रकाशनद्वयं समुपस्थितैरतिथिः लोकायार्पितम्। प्रो. शशितिवारीद्वारासम्पादितं पुस्तकद्वयंप्रतिभाप्रकाशनेनप्रकाशितम्। सद्यः प्रकाशितं पुस्तकद्वयमिदं द्वयोः वरिष्ठ-वेव्ससदस्ययोः प्रो. भूदेवशर्म- प्रो. लल्लनप्रसादमहोदययोः सम्माने समर्पितम्। वर्षेऽस्मिन् स्वर्गीय-श्रीरामेश्वरदासगुप्ता-स्मृतिपुरस्कारः 2017 युवशोधार्थिषु उत्कृष्टशोधपत्रप्रस्तुतये समुद्घोषितः। एतदर्थं 13000/- रूप्यकाणि डॉ. वेदवतीवैदिकमहोदयया समर्पितानि। डॉ. आशारानी त्रिपाठी, डॉ. धर्मा शर्मा, डॉ. उर्मिलारुस्तगी, डॉ. पंकजकुमारमिश्रः, प्रो. दिनेशचन्द्रशास्त्री, डॉ. अञ्जु सेठ इति षण्णां सदस्यानां निर्णेतर्दिलमेकं प्रकल्पितम्। तत्र युवशोधार्थिषु अष्टौ शोधार्थिनां शोधपत्राणि पुरस्काराय चितानि। स्मापनसत्रे वरिष्ठपत्रकारेण डॉ. वेदप्रतापवैदिकमहोदयेन इमे शोधार्थिनः युवशोधार्थिपुरस्कारेण सम्मानिताः।

विद्वत्सम्मानम् पुरस्कृताः शोधार्थिनः निर्णायकाश्च

प्रथमपुरस्कारौ -1. श्री तहसीनमण्डलः, अलीगढमुस्लिमविश्वविद्यालयः, अलीगढम्।

2. सुश्री सन्ध्या गुप्ता, जवाहरलालनेहरू-विश्वविद्यालयः, दिल्ली।

द्वितीयपुरस्कारौ -1. सुश्री निहारिका, जवाहरलालनेहरू-विश्वविद्यालयः, दिल्ली।

2. नन्दिनी दास, जवाहरलालनेहरू-विश्वविद्यालयः, दिल्ली।

तृतीयपुरस्कारौ -1. श्री नीतीशकुमारः, दिल्ली-विश्वविद्यालयः, दिल्ली।

2.डॉ. ऋषिराजपाठकः, एस.पी.एम. महविद्यालयः, दिल्ली।

प्रोत्साहनपुरस्कारौ - 1. डॉ. संगीता शर्मा, एन.सी.ई.आर.टी., दिल्ली।

2 डॉ. अर्पिता चक्रवर्ती, डिब्रुगढ-विश्वविद्यालयः, असमः।

'वेव्स' इत्यस्याः संस्थायाः अध्यक्षया प्रो. शशितिवारीमहोदयया महतशैक्षिकसमारोहेऽस्मिन् समुपस्थितानामभ्यागतविदुषामतिथीनां, शोधपत्रप्रोस्तोतर्णिां, वेव्ससदस्यानां, कार्यकर्तर्णिां भारतीयविद्याभवनस्य च सहयोगाय योगदानाय च धन्यवादवचांसि व्याहृतानि। शान्तिपाठेन राष्ट्रगानेन च सम्मेलनमिदं समाप्तिमधिगतम्।

# अखिलप्रपञ्चे सर्वोत्तमोऽस्ति भारतीयसंस्कृतिः -प्रो.रमेशकुमारपाण्डेय

नवदेहली। दिल्ली संस्कृत अकादमी वर्ष 2017 इत्यस्य समापनस्यावसरे संस्कृतसाहित्ये सदाचार विषये आयोजित संगोष्ठयाः आयोजनं कृतम्। आस्मिन्नवसरे अकादम्या अनेक विद्वान्सः स्व विचारं प्रस्तुतवन्तः।

संगोष्ठ्याः मुख्यातिथि श्रीलालबहादुशास्त्रीराष्ट्रिसंस्कृत विद्यापीठस्य कुलपति प्रो.रमेशकुमारपाण्डेयः उक्तवान् यत् अस्माकं संस्कृति विश्वे



सर्वाधिक प्रभावि एवं श्रेष्ठोऽस्ति। ते उक्तवन्तः यत् अमेरीकायां प्रचल्यमान विश्वजेनेटिक व्याधिनां विषये आयोजित संगोष्ठ्यां वैज्ञानिकाः स्व विचारं व्यक्तवन्तः यत् भारते जेनेटिक व्याधीभ्यः पुर्वेणैव ऋषि परम्परायाः निर्माणं कृतवान् यत् सगोत्रे विवाहः न सम्भवोऽस्ति। येन जेनेटिक व्याधि न भविष्यति। भारतीय ज्ञान-विज्ञानं विश्वस्य कृते बहु विलक्षणोऽस्ति। अस्माकं संस्कृति विश्वे सर्वं मार्गदर्शनं प्रददाति।

अस्मिन्नवसरे श्रीलालबहादुशास्त्रीराष्ट्रिसंस्कृत विद्यापीठस्य वास्तुविभागाध्यक्ष प्रो. देवीप्रसाद त्रिपाठी उक्तवान यत् सदाचारः भारतीय संस्कृते महत्वपूर्णम् अंगोऽस्ति। केन सह केन प्रकारेण व्यवहरतव्यंम् इयं परम्परा भारतीयसंस्कृत्यातिरिक्त कुत्रापि नास्ति।

अस्मिन्नवसरे संगोष्ठ्याः प्रस्तावना समये दिल्ली संस्कृत-अकादम्याः सचिवः डॉ. जीतरामभट्टः उक्तवान यत् संस्कृते सदाचारम् अनेक श्लोकानां रचना जातः यो अस्मान् प्रत्येकस्मिन् क्षेत्रे सदाचारं प्रति प्रेरयति।

संगोष्ठ्याः आचार्यश्रीनिवासंस्कृतविद्यापीठस्य आचार्य श्री गोविन्दचार्य उक्तवान यत् साहित्ये शब्द एवं अर्थस्य विशेष महत्वमस्ति। संस्कृतसाहित्य आदिकालादेव लिखित रूपे अस्ति तर्हि स्पष्टोऽस्ति यत् हिन्दीसाहित्यस्योत्पत्ती संस्कृतसाहित्यनैव अभवत्।

अस्मिन्नवसरे अनेक गणमान्य जनाः उपस्थिताः अगसन्।



## कुसुमेश्वरमहादेव मन्दिरं सेवानगरे भिवान्या संस्कृत -हिन्दी-उर्दू-हरियाणवी कवि सम्मेलनम् सञ्जातम्

25/12/2017 दिनांके सोमवासरे कुसुमेश्वरमहादेव मन्दिरं सेवानगरं भिवान्या संस्कृत -हिन्दी-उर्दू-हरियाणवी कवि सम्मेलनम् अभवत्। कविषु श्री जगन्नाथ महाराज, श्री रामेश्वर दत्त, श्री धर्मवीर, श्रीकृष्ण मञ्झर, ज्ञानेन्द्र तेवतिया, सुश्री हेमलता, बिजेन्द्र गाफिल,



मनोज भारत, रमेश चन्द्र, श्रीनिवास मयंक, कैलाश शाहीन, हनुमान अग्निमुख, केशव जाविर, अमित पृथ्वीपुत्र, सत्यवान सैन, पूनम



चन्द वेणु, गीता सिंह, रमेश शास्त्री, श्रीनिवास मयंक, डॉ रमाकांत शर्मा, अनिल गौड़, श्रीनिवास, डॉ शिवकान्त, श्याम वासिष्ठ प्रभृतयः काव्यपाठं कृतवन्तः। अस्मिन्नवसरे श्रीमान् जयप्रकाशः जी उत्तरक्षेत्र संघटनमन्त्री संस्कृतभारती, डॉ श्रेयांश द्विवेदी, उपाध्यक्षः, हरियाणा संस्कृत अकादमी पञ्चकूला, श्रीमान् महेश जोशी, मुख्य सलाहकार हरियाणा कला परिषद्, श्रीमान् प्रमोद शास्त्री प्रान्ताध्यक्ष, अखिल भारतीय विद्यार्थी परिषद्, हरियाणा प्रभृतयःअतिथयः समुपस्थिताः आसन्। कार्यक्रमस्य आयोजकः शिवनारायण शास्त्री मञ्चसञ्चालनं रमाकांत शर्मणाकृतम्।

**पाठकानां कृते सूचनाः-**

**कृपया संस्कृत-संवादः पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुं पञ्चवार्षिकशुल्कं रु ६००/- (संस्थादीनां कृते) द्विवार्षिकशुल्क रु. २४०/- (व्यक्तीनां कृते) मनिऑर्डरः, चैकः ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्-**

**Sanskrit samvad,**
**Current A/C No. 22490200000142,**
**Indian Overseas Bank, Yamuna Vihar, Delhi-110053**
**IFC Code- IOBA0002249**




अस्माकं प्रेरणास्त्रोतः- स्व.पं० रामकिशोरशर्मा,
परामर्शकाः-डॉ.रमाकान्तशुक्लः, डॉ.रवीन्द्रनागरः, डॉ.धर्मेन्द्रकुमारः, डॉ.बलदेवानन्दसागरः, आचार्यपंकजः,
सम्पादिका-मञ्जूशर्मा, उपसम्पादकः- डॉ. सन्नीकुमार, संदीप कुमार उपाध्याय, राजेशकुमारझा, प्रबन्धसम्पादकौ- वेदप्रकाशशर्मा, नेहाशर्मा च,